2

॥ तिथि-निर्णय ॥

Arutsakthi
Nagarajan

P GE 3 RUN
ED

CORRECTIVE DATA --CORRECTIONS DATA

CUMULATIVE TOTAL	PAGE	SCH	ORIG SCH	OTH BRCH	ORIG. DATE
1,85,092.65	02				
400.00	01				
698.00	01				
6,910.50	01				
	01				
6,910.50	01				
7,109.00	01				
7,929.00	01				
59,021.45	01				
7,98,569.70	01				
	01				
7,98,569.70	01				
48.00	01				
588.00	01				
	01				
588.00	01				
	01				
	01				
404.60	01				
764.60	01				
1,161.30	01				
1,347.30	01				
	01				
1,347.30	01				
12,000.00	01				
	01				
12,000.00	01				

உ

॥ तिथि नित्या ॥

ஸ்ரீவித்யா

(காமேச்வர்யாதி — ஜ்வாலாமாலின்யந்த [illegible]
[illegible] நித்யாக்ஷோடசகா: பாவனோப
[illegible] [illegible] [illegible])

[illegible]
[illegible]

॥ तिथि नित्या ॥

(गणपत्युपनिषत्, देवीखड्गमालास्तोत्रम्, षोडशनित्या
ध्यानश्लोकाः, भावनोपनिषत्,
भावनोपनिषत्प्रयोगः)



Printed At The
Sri Janardana Printing Works, Ltd.,
Town High School Road,
Kumbakonam.

 0—12—0

॥ तिथि नित्या ॥

(गणपत्युपनिषत्, देवीखड्गमालास्तोत्रम्, षोडशनित्या ध्यानश्लोकाः, भावनोपनिषत् भावनोपनिषत्प्रयोगः)

Printed at the
Sri Janardana Printing works, Ltd.,
Town High School Road,
Kumbakonam.

1954

0—12—0.

Published by
S. KALYANASUNDARAM,
of
The Sri Janardana Printing Works Limited,
Town High School Road,
Kumbakonam.

பிழைத் திருத்தம்.

பக்கம்	வரி	பிழை	திருத்தம்
		॥ गणपत्युपनिषत् ॥	
२	१६	चतुर्ध्यामनश्चक्षपति	चतुर्थ्यामनश्नन्पति
		॥ देवीखड्गमालास्तोत्रम् ॥	
२	४	उड्याणमयि	उद्यानमयि
,,	१४	सर्वास्त्रखण्डिणि	सर्वास्त्रखण्डिनि
		॥ फलश्रुतिः ॥	
३	१४	नाशिनि	नाशिनी
		॥ श्री षोडशनित्या ध्यानश्लोकाः ॥	
९	२२	अनर्ध्यरत्नघटित	अनर्घ्यरत्नघटित
,,	२४	लसद्वक्षस्थलां	लसद्वक्षःस्थलां
		DYANA SLOKAS.	
19	14	Jvarita Nitya	Tvarita Nitya
21	9	Vigaya Nitya	Vijaya Nitya
		॥ भावनोपनिषत् ॥ (१)	
२	१३	ब्रह्मनूलम्	ब्रह्मसूत्रम्
		॥ भावनोपनिषत्प्रयोगः ॥	
५	७	श्रीभावनोपनिषत्महामन्त्रस्य	श्रीभावनोपनिषत्प्रयोग-[महामन्त्रस्य
,,	१४	हीं	ह्रीं
६	११	ह्वजरूप कुह्यात्मने	ध्वजरूप गुह्यात्मने

பக்கம்	வரி	பிழை	திருத்தம்
,,	१५	तत्तत्स्थनानि संपृश्य	तत्तत्स्थानानि संस्पृश्य
७	५	शुक्रात्मने	शुक्लात्मने
,,	१४	शुक्राधिदेवतायै	शुक्लाधिदेवतायै
,,	१८	ओजोऽधितेवतायै	ओजोऽधिदेवतायै
,,	२४	कटुरसात्मत्ने	कटुरसात्मने
९	२३	करुणरसात्मने	करुणारसात्मने
,,	१७	सहस्रदलकमलात्मने	पादाङ्गुष्ठद्वयरूप-[सहस्रदलकमलात्मने
११	२२	अमूर्ताकर्षिणी	अमृताकर्षिणी
१२	११	वामशङ्खरूप	वामजङ्घरूप
,,	१७	ललाटदक्षभागरूपगुह्यात्मने	ललाटदक्षभागरूपगुह्यात्मने
,,	१९	दक्षांसरूपवारणात्मने	दक्षांसरूपवरुणात्मने
१३	२०	वशितासिद्ध्यै	वशित्वसिद्ध्यै
,,	२४	दक्षसृक्किरूपपाचकाग्न्यात्मने	दक्षसृक्किरूपपूरकाग्न्यात्मने
१४	१३	हृदयदक्षभागरूसुखात्मने	हृदयदक्षभागरूपसुखात्मने
,,	२२	सर्वजम्भनबाणेभ्यो	सर्वजृम्भनबाणेभ्यो
१५	१	वज्रेश्वर्यै	वज्रेश्वरी
१७	६	विपयजडतानिरासेन	विपयजडतानिराशेन

ॐ

॥ गणपत्युपनिषत् ॥

यं नत्वा मुनयः सर्वे निर्विघ्नं यान्ति तत्पदम् ।
गणेशोपनिषद्वेद्यं तद्ब्रह्मैवास्मि सर्वगम् ॥ १ ॥

ॐ भद्रं कर्णेभिश्शृणुयाम देवाः, भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः, व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदाः, स्वस्ति न स्तार्क्ष्यो अरिष्टनेमिः, स्वस्ति नो बृहस्पतिर्दधातु । ओं शान्तिश्शान्तिश्शान्तिः ॥

हरिः ॐ ॥ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षादात्मासि नित्यम् । ऋतं वच्मि । सत्यं वच्मि । अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अव चोत्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहि पाहि समन्तात् । त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः । त्वं सच्चिदानन्दाद्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि । त्वं ज्ञानमयो विज्ञानमयोऽसि । सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति । सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति । त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि । त्वं गुणत्रयातीतः । त्वं कालत्रयातीतः । त्वं देहत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् । त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् । त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवःसुवरोम् । गणादिं पूर्वमुच्चार्य वर्णादिं तदनन्तरम् । अनुस्वारः परतरः । अर्धेन्दुलसितम् ॥ १ ॥ तारेण रुद्धम् । एतत्तव मनुस्वरूपम् । गकारः पूर्वरूपम् । अकारो मध्यमरूपम् ।

अनुस्वारश्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः संधानम् । संहिता संधिः । सैषा गणेशविद्या । गणक ऋषिः निचृद्गायत्री छन्दः । श्रीमहागणपतिर्देवता । ॐ गम् । (गणपतये नमः) । एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ॥ एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् । अभयं वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् । रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ॥ भक्तानुकम्पिनं देवं जगत्कारणमच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः । नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये नमोनमः ॥ ॥ एतदथर्वशिरो योऽधीते स ब्रह्मभूयाय कल्पते । स सर्वविघ्नैर्न बाध्यते । स सर्वतः सुखमेधते । स पञ्चमहापातकोपपातकात्प्रमुच्यते । सायमधीयानो दिवसकृतं पापं नाशयति । प्रातरधीयानो रात्रिकृतं पापं नाशयति । सायं प्रातः प्रयुंजानोऽपापो भवति । धर्मार्थकाममोक्षं च विन्दति । इदमथर्वशीर्षमशिष्याय न देयम् । यो यदि मोहाद्दास्यति स पापीयान्भवति । सहस्रावर्तनाद्यं यं काममधीते तं तमनेन साधयेत् । अनेन गणपतिमभिषिञ्चति स वाग्मी भवति । चतुर्थ्यामनश्नञ्जपति स विद्यावान्भवति । इत्यथर्वणवाक्यम् । ब्रह्माद्याचरणं विद्यात् । न बिभेति कदाचनेति । यो दूर्वाङ्कुरैर्यजति स वैश्रवणोपमो भवति । यो लाजैर्यजति स यशोवान्भवति । स मेधावान्भवति । यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति । यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते । अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासंनिधौ वा जप्त्वा सिद्धमन्त्रो भवति । महाविघ्नात्प्रमुच्यते । महापापात्प्रमुच्यते । महादोषात्प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति । य एवं वेदेत्युपनिषत् ॥ ॐ भद्रं कर्णेभिरिति शान्तिः ॥ हरिः ॐ तत्सत् ॥

इति गणपत्युपनिषत्समाप्ता ॥

ॐ

श्री गणेशाय नमः

॥ श्री गणेशाष्टकम् ॥

सर्वे ऊचुः —

यतोऽनन्तशक्तेरनन्ताश्च जीवा यतो निर्गुणादप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं सदा तं गणेशं नमामो भजामः ॥ १

यतश्चाविरासीज्जगत्सर्वमेतत्तथाऽब्जासनो विश्वगो विश्वगोप्ता ।
तथेन्द्रादयो देवसङ्घा मनुष्याः सदा तं गणेशं नमामो भजामः ॥ २

यतो वह्निभानू भवो भूर्जलं च यतः सागराश्चंद्रमा व्योम वायुः ।
यतः स्थावरा जंगमा वृक्षसंघाः सदा तं गणेशं नमामो भजामः ॥ ३

यतो दानवाः किन्नरा यक्षसंघा यतश्चारणा वारणाः श्वापदाश्च ।
यतः पक्षिकीटा यतो वीरुधश्च सदा तं गणेशं नमामो भजामः ॥ ४

यतो बुद्धिरज्ञाननाशो मुमुक्षोर्यतः संपदो भक्तसन्तोषदाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः सदा तं गणेशं नमामो भजामः ॥ ५

यतः पुत्रसम्पद्यतो वाञ्छितार्थो यतोऽभक्तविघ्नास्तथाऽनेकरूपाः ।
यतः शोकमोहौ यतः काम एव सदा तं गणेशं नमामो भजामः ॥ ६

यतोऽनन्तशक्तिः स शेषो बभूव धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना सदा तं गणेशं नमामो भजामः ॥ ७

यतो वेदवाचोऽतिकुण्ठा मनोभिः सदा नेतिनेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानन्दभूतं सदा तं गणेशं नमामो भजामः ॥ ८

श्री गणेश उवाच —

पुनरूचे गणाधीशस्तोत्रमेतत्पठेन्नरः ।
त्रिसन्ध्यं त्रिदिनं तस्य सर्वकार्यं भविष्यति ॥ ९

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभम् ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥ १०

यः पठेन्मासमात्रं तु दशवारं दिने दिने ।
स मोचयेद्बन्धगतं राजवध्यं न संशयः ॥ ११

विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वांछितांल्लभते सर्वानेकविंशतिवारतः ॥ १२

यो जपेत्परया भक्त्या गजाननपरो नरः ।
एवमुक्त्वा ततो देवश्चान्तर्धानं गतः प्रभुः ॥ १३

श्रीरस्तु.

श्रीबालात्रिपुरसुन्दर्यै नमः.

॥ देवीखड्गमालास्तोत्रम् ॥

(श्लो) ह्रींकारासनगर्भितानलशिखां सौः क्लीं कलां बिभ्रतीं
सौवर्णाम्बरधारिणीं वरसुधाधौतां त्रिनेत्रोज्ज्वलाम् ।
वन्दे पुस्तकपाशमङ्कुशधरां स्रग्भूषितामुज्ज्वलां
त्वां गौरीं त्रिपुरां परात्परकलां श्रीचक्रसंचारिणीम् ॥

अस्य श्रीशुद्धशक्तिमालामन्त्रस्य, उपस्थेन्द्रियाधिष्ठात्री वरुणादित्यऋषिः. देवीगायत्री च्छन्दः, सात्त्विकककारभट्टारकपीठस्थितकामेश्वराङ्कनिलया महा-कामेश्वरी श्रीललिता भट्टारिकादेवता, ऐम् बीजं, क्लीं शक्तिः, सौः कीलकं, मम खड्गसिद्ध्यर्थे,सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः। मूलमन्त्रेण षडङ्गन्यासं कुर्यात्॥

॥ ध्यानम् ॥

तादृशं खड्गमाप्नोति येन हस्तस्थितेन वै ।
अष्टादशमहाद्वीपसम्राड्भोक्ता भविष्यति ॥

आरक्ताभां त्रिणेत्रा मरुणिमवसनां रत्नताटङ्करम्यां
हस्ताम्भोजैस्सपाशाङ्कुश मदनधनु स्सायकैर्विस्फुरन्तीम् ।
आपीनोत्तुङ्गवक्षोरुहतटविलुठत्तारहारोज्ज्वलाङ्गीं
ध्यायेदम्भोरुहस्थामरुणिमवसनामीश्वरीमीश्वराणाम् ॥

लं इत्यादि पञ्चपूजां कुर्यात् - यथाशक्तिमूलमन्त्रं जपेत् ॥

ओं ऐं ह्रीं श्रीं. ओं नमस्त्रिपुरसुन्दरि, ।

हृदयदेवि, शिरोदेवि, शिखादेवि, कवचदेवि, नेत्रदेवि, अस्त्रदेवि, कामेश्वरि, भगमालिनि, नित्यक्लिन्ने, भेरुण्डे, वह्निवासिनि, महावज्रेश्वरि,

विचित्रे, परशिवदूति, त्वरिते, कुलसुन्दरि, नित्ये, नीलपताके, विजये, सर्व-मङ्गळे, ज्वालामालिनि, चित्रे, महानित्ये, ।

परमेश्वरपरमेश्वरि, मित्रेशमयि, मन्त्रेशमयि, षष्ठीशमय्युड्डीशमयि, उड्डीशमयि, चर्यानाथमयि, लोपामुद्रामय्यगस्त्यमयि, कालतापनमयि, धर्माचार्यमयि, मुक्तकेशीश्वरमयि, दीपकलानाथमयि, विष्णुदेवमयि, प्रभाकर-देवमयि, तेजोदेवमयि, मनोजदेवमयि, कल्याणदेवमयि, रत्नदेवमयि, वासुदेव-मयि, ।

श्रीरामानन्दमय्यणिमासिद्धे, लघिमासिद्धे, गरिमासिद्धे, महिमासिद्धे, ईशित्वसिद्धे, वशित्वसिद्धे, प्राकाम्यसिद्धे, भुक्तिसिद्धे इच्छासिद्धे, प्राप्तिसिद्धे, सर्वकामसिद्धे, रससिद्धे, मोक्षसिद्धे, ।

ब्राह्मि, माहेश्वरि, कौमारि, वैष्णवि, वाराहि, माहेन्द्रि, चामुण्डे, महालक्ष्मीः, ।

सर्वसंक्षोभिणि, सर्वविद्राविणि, सर्वाकर्षिणि, सर्ववशंकरि, सर्वोन्मादिनि, सर्वमहाङ्कुशे, सर्वखेचरि, सर्वबीजे, सर्वयोने, सर्वत्रिखण्डे, सर्वत्रिखण्डिणि, त्रैलोक्यमोहनचक्रस्वामिनि, प्रकटयोगिनि, बौद्धदर्शनाङ्गि, ।

कामाकर्षिणि, बुद्ध्याकर्षिण्यहंकाराकर्षिणि, शब्दाकर्षिणि, स्पर्शाकर्षिणि, रूपाकर्षिणि, रसाकर्षिणि, गन्धाकर्षिणि, चित्ताकर्षिणि, धैर्याकर्षिणि, स्मृत्याकर्षिणि, नामाकर्षिणि, बीजाकर्षिण्यात्माकर्षिण्यमृताकर्षिणि, शरीराकर्षिणि, सर्वाशापरिपूरक-चक्रस्वामिनि, ।

गुप्तयोगिन्यनङ्गकुसुमेऽनङ्गमेखलेऽनङ्गलेखेऽनङ्गमदनेऽनङ्गमादिनिऽनङ्ग-मदनातुरेऽनङ्गरेखेऽनङ्गवेगिन्यनङ्गाङ्कुशेऽनङ्गमालिनि, सर्वसंक्षोभणचक्रस्वामिनि, गुप्ततरयोगिनि; वैदिकदर्शनाङ्गि, पूर्वाम्नायादिदेवते, मणिपूरे, ।

सर्वसङ्क्षोभिणि, सर्वविद्राविणि, सर्वाकर्षिणि, सर्वाह्लादिनि, सर्वसंमोहिनि, सर्वस्तंभिनि, सर्वजृंभिणि, सर्ववशङ्करि, सर्वरञ्जिनि, सर्वोन्मादिनि, सर्वार्थसाधिनि, सर्वसंपत्तिपूरणि, सर्वमन्त्रमयि, सर्वद्वन्द्वक्षयङ्करि, सर्वसौभाग्यदायकचक्रस्वामिनि, संप्रदाययोगिनि, सौरदर्शनाङ्गि, ।

सर्वसिद्धिप्रदे, सर्वसंपत्प्रदे, सर्वप्रियङ्करि, सर्वमङ्गलकारिणि, सर्वकामप्रदे, सर्वदुःखविमोचिनि, सर्वमृत्युप्रशमनि, सर्वविघ्ननिवारिणि, सर्वाङ्गसुन्दरि, सर्वसौभाग्यदायिनि, सर्वार्थसाधकचक्रस्वामिनि, कुलोत्तीर्णयोगिनि, ।

सर्वज्ञे, सर्वशक्ते, सर्वैश्वर्यप्रदे, सर्वज्ञानमयि, सर्वव्याधिविनाशिनि, सर्वाधारस्वरूपे, सर्वपापहरे, सर्वानन्दमयि, सर्वरक्षास्वरूपिणि, सर्वेप्सितप्रदे, सर्वेप्सितफलप्रदे, सर्वरक्षाकरचक्रस्वामिनि, निगर्भयोगिनि, निगर्भयोगिनि, वैष्णवदर्शनाङ्गि, दक्षिणाम्नायेशि, स्थितिरूपे,

वशिनि, कामेश्वरि, मोदिनि, विमले, अरुणे, जयिनि, सर्वेश्वरि, कौलिनि, सर्वरोगहरचक्रस्वामिनि, रहस्ययोगिनि, रहस्यगोपिनि, रहस्यभोगिनि, शाक्तदर्शनाङ्गि, पश्चिमाम्नायेशि, ।

बाणिनि, चापिनि, पाशिन्यङ्कुशिनि, महाकामेश्वरि, महावज्रेश्वरि, महाभगमालिनि, महाश्रीसुन्दरि, सर्वसिद्धिप्रदचक्रस्वामिनि, अतिरहस्ययोगिनि, शैवदर्शनाङ्गि, ।

श्रीश्रीमहाभट्टारिके, सर्वानन्दमयचक्रस्वामिनि, उत्तराम्नायेशि, संहाररूपे, शुद्धपरे, बिन्दुपीठगते, परापररहस्ययोगिनि, शांभवदर्शनाङ्गि, ।

त्रिपुरे, त्रिपुरेशि, त्रिपुरसुन्दरि, त्रिपुरवासिनि, त्रिपुराश्रीः, त्रिपुरमालिनि, त्रिपुरासिद्धे, त्रिपुराम्ब, महात्रिपुरसुन्दरि, महात्रिपुरभैरवी, सर्वचक्रस्थे, अनुत्तराम्नायाख्यस्वरूपे, चतुर्विधगुणरूपे, कुले, अकुले, कुलाकुले, महाकौलिनि, सर्वोत्तरे,

सर्वदर्शनाङ्गि, नवासनस्थिते, नवाक्षरि, नवमिथुनाकृते, महेशमाधवविधातृमन्मथ-स्कन्दनन्दीन्द्रमनुचन्द्रकुबेरागस्त्यदुर्वासक्रोधभट्टारिकविद्यात्मिके, कल्याणतत्व-त्रयरूपे, शिवशिवात्मिके, पूर्णब्रह्मचक्रे, महापरमेश्वरि, ।

महामाहेश्वरि, महामहाराज्ञि, महामहाशक्ते, महामहागुप्ते, महामहाज्ञप्ते, महामहानन्दे, महामहास्पन्दे, महामहाशये, महामहाश्रीचक्रनगरसंराज्ञि, नमस्ते नमस्ते, नमस्ते, श्रीमहात्रिपुरसुन्दरि तव श्रीपादुकां पूजयामि नमः, $\frac{\text{मूलम्}}{15}$ श्रीं ह्रीं ऐं ॥

ॐ

॥ देवीखड्गमाला फलश्रुतिः ॥

१. एषा विद्या महासिद्धिदायिनी स्तुतिमालतः ।
अग्निबाधा महाक्षोभे राज्ञो राष्ट्रस्य विप्लवे ॥

२. लुण्ठने तस्करभये संग्रामे सलिलप्लवे ।
समुद्रयानविक्षोभे भूतप्रेतादिजेभये ॥

३. शाकिनी पूतना यक्षरक्ष कूष्माण्डजे भये ।
अपस्मारज्वरव्याधि मृत्यून्मादादिजे भये ॥

४. मित्रभेदे ग्रहभये व्यसनेष्वाभिचारिके ।
अन्येष्वपि च दोषेषु मालामन्त्रं स्मरेन्नरः ॥

५. सर्वोपद्रव निर्मुक्त स्साक्षाच्छिवमयो भवेत् ।
आपत्काले नित्यपूजां विस्तरात्कर्त्तुमक्षमः ॥

६. एकवार जपादेव सर्वपूजाफलं लभेत् ।
नवावरण देवीनां ललिताया महौजसः ॥

७. एकत्र गणनारूपो वेदवेदाङ्ग गोचरः ।
सर्वागम रहस्यार्थस्मरणात्पापनाशिनि ॥

८. ललिताया महेशान्या मालाविद्या महीयसी ।
नरवश्यं नरेन्द्राणां वश्यं नारीवशङ्करी ॥

९. अणिमादि गुणैश्वर्यं रञ्जनं पापभञ्जनम् ।
तत्तदावरणस्थायि देवता ब्रह्म मन्त्रजम् ॥

१०. माला मन्त्रं परं गुह्यं परंधाम प्रकीर्तितम् ।
शक्ति माला पञ्चधास्यच्छिवमाला च तादृशी ॥
तस्माद्गोप्यतराद्गोप्यं रहस्यं भुक्तिमुक्तिदम् ।

श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं
सिद्धौघं बटुकत्रयं पदयुगं दूतीक्रमं मण्डलम् ।
वीराद्यष्टचतुष्कषष्टिनवकं वीरावलीपञ्चकं
श्रीमन्मालिनिमंत्रराजसहितं वन्दे गुरोर्मण्डलम् ॥

इति वामकेश्वर तन्त्रे उमामहेश्वर संवादे देवी खड्गमाला स्तोत्रं संपूर्णम् ॥

குறிப்பு.

இதிநித்யா பூஜைகள் ஸ்ரீசக்ர பூஜையில் குருமண்டல பூஜைக்கும் முன் த்ரிகோணத்தில் அவரவர்களின் மூல மந்த்ரங்கள் பக்கத்திற்கு ஐந்து தேவதைகளாக பூஜை செய்யும்படி சொல்லப்பட்டிருக்கிறது என்பது சாக்தர்களுக்குத் தெரிந்த விஷயம். அந்தந்த தேவதைகளின் த்யான ச்லோகங்களின் ஆங்கில, தமிழ் மொழிபெயர்ப்பு வெளியிடப்பட்டுள்ளன. மேற் சொல்லப்பட்ட தேவதைகளின் மூலவித்யா ந்யாஸங்கள் அங்க கர ந்யாஸங்கள், சக்ரங்கள் ஆவரண பூஜைகள் முதலியவை களை அறிய விரும்புவோர் ஜனார்தந பிரஸ் ஸ்ரீ S. கல்யாண ஸுந்தரமய்யர் அவர்களுக்குத் தெரிவித்தால் ஷை பூஜைகள் பூராவும் மேற்கொண்டு அவசியப்படி வெளியிட ஏற்பாடு செய்யப்படும்.

இப்படிக்கு
தங்கள் விதேயன்
ஞானாநந்தர் சிஷ்யன்
ராமாநந்தன்.

|| श्रीगुरुभ्यो नमः ||

|| श्री गणेशाय नमः ||

|| श्री महात्रिपुरसुन्दर्यै नमः ||

முகவுரை.

"पञ्चदश तिथिरूपेण कालस्य परिणामावलोकनस्थितिः पञ्चदशनित्याः" என்னும் "பாவநோபநிஷத்" வாக்யத்தின் பிரகாரம், ஆதி சித் சக்தி ஸ்வரூபிணியான லலிதா பரமேச்வரியானவள், தனக்கு வெகு சமீபத்தில் இருக்கின்றவர்களும், தன்னையே அனவரதமும் அந்தர்முகமாகவும் பஹிர்முகமாகவும் பூஜிக்கின்றவர்களும், தனக்கு அவ்வப்போது செய்யவேண்டிய கார்யங்களைச் செய்கின்றவர்களும், தனக்கு அதிகப் பிரியமானவர்களும், தனக்கு அடுத்தபடியாக இருக்கின்றவர்களும், மற்ற எல்லா சக்திகளுக்கும் மேற்பட்டவர்களுமாகிய பதினைந்து திதி நித்யைகளை—ஒவ்வொரு நித்யையையும் ஒவ்வொரு திதிக்கு அதிஷ்டான தேவதையாக பிரதமைமுதல் பூர்ணிமாவரையிலுள்ள பதினைந்து திதிகளுக்கும் ஜகத் உஜ்ஜீவிக்கும் பொருட்டு நியமித்து, யார் யார் எந்தெந்த கர்மாக்களை எந்தெந்த திதியில் செய்கிறார்களோ அவரவர்களுக்கு, அந்தந்த கர்மாக்களுக்குத் தகுந்தவாறு பலன்களைக் கொடுக்கும்படி ஆக்ஞாபித்து விளங்குகிறாள்.

அகில அண்ட சராசரங்களைப் படைத்தவளும், ஜோதி ஸ்வரூபமானவளும், ஸர்வானந்தமயமானவளும், தனக்கு மேல் வேறொருவரும் இல்லாதவளும், ஏகமானவளும் இரண்டற்றவளும், உள்ளும் புறமும் வியாபித்திருப்பவளும், ஸர்வ ஜீவகோடிகளுக்கும் அந்தராத்மாவாக இருப்பவளும், எவர் எவர் எந்தெந்த கர்மாக்களைச் செய்கின்றார்களோ, அவரவர்களுக்குச் சாக்ஷிபூதையாக விளங்குபவளும், ஸர்வசக்தி வாய்ந்தவளும், ஸர்வவ்யாபினியாகவிருப்பவளும், சித் ஸ்வரூபமாக இருப்பவளுமாகிய லலிதா பரமேச்வரியானவள், தானே

பதினறுவது நித்யையாக இருந்துகொண்டு, தன்னால் படைக்கப்பட்ட ஸமஸ்த அண்டகோடி சராசரங்களிலுள்ளவர்களின் கர்மாக்களுக்குத்தகுந்தவாறு பலன்களையளிக்கப் பதினைந்து திதி நித்யைகளை நியமித்து, அவரவர்கள் செய்கைகளையும், கர்மாக்களையும், கர்மாக்கள் செய்கிறவர்களையும் கவனித்துக்கொண்டு சாக்ஷி ரூபிணியாக விளங்குகின்றாள்.

இவ்வாறுள்ள பதினாறு திதி நித்யைகளின் த்யான ச்லோகங்கள், தமிழ், ஆங்கில உரையுடன் இவ்விதழில் வெளியிடப்பட்டிருக்கின்றன. இந்த த்யான ச்லோகங்களை ப்ரதிதினமும் பாராயணம் செய்வதாலேயே பதினாறு திதிநித்யைகளைக் கிரமமாகப் பூஜைகள் செய்த பலன்களை அடைகின்றனர். மேற்கொண்டு இத்திதி நித்யைகளின் பூஜாக்ரம யந்த்ரவிஷயங்களை அறிய விரும்புவோர்கள் சிவபிரான் உமைக்கு குரு சிஷ்ய பாவனையில் அருளிச்செய்த Tantraraja Tantra Vol VIII & XII என்னும் கிரந்தத்தைப்பார்த்து தெரிந்துகொள்ளவும். மேற்படி திதி நித்யைகளின் கிரியை, பராக்கிரமங்கள் ஆகியவற்றை பிரம்மாண்ட புராணத்தின் உத்தர பாகத்தில் ஹயக்ரீவாகஸ்த்ய ஸம்வாத ரூபமாக உள்ள லலிதோபாக்யானம் என்னும் கிரந்தத்தின் இருபதாவது அத்யாயத்தில் விரிவாகக் காணலாம்.

उ

॥ श्रीगुरुभ्यो नमः ॥

॥ श्री गणेशाय नमः ॥

॥ श्री महात्रिपुरसुन्दर्यै नमः ॥

श्री षोडशनित्या ध्यानश्लोकाः ॥

॥ कामेश्वरी नित्या ॥

ध्यानम् ॥

बालार्क कोटि सङ्काशां माणिक्य मुकुटोज्ज्वलाम् ।
हारग्रैवेय काञ्चीभिरूर्मिकानूपुरादिभिः ॥ १ ॥

मण्डितां रक्तवसनां रत्नाभरणशोभिताम् ।
षड्भुजां त्रीक्षणामिन्दुकलाकलितमौलिकाम् ॥ २ ॥

पञ्चाष्टषोडशद्वन्द्वषट्कोण चतुरश्रगाम् ।
मन्दस्मितोल्लसद्वक्त्रां दयामन्थरवीक्षणाम् ॥ ३ ॥

पाशाङ्कुशौ च पुण्ड्रेक्षुचापं पुष्पशिलीमुखम् ।
रत्नपात्रं सुधापूर्णं वरदं बिभ्रतीं करैः ॥ ४ ॥

காமேச்வரீ நித்யையானவள், கோடி இளம் ஸூர்யர்களின் காந்திக்கொப்பானவளும், மாணிக்க மகுடமுள்ளவளும், தங்க அட்டிகை, கழுத்துச்சங்கிலி, ஒட்டியாணம், மோதிரம், கால் கொலுசு இவைகளை அணிந்தவளும், ரத்னபாணங்கள் பூண்டவளும், சிகப்பு வஸ்திரம் அணிந்தவளும், ஆறு கைகள், மூன்று கண்கள், தலையில சந்திரகலை இவைகளோடு புன்சிரிப்புள்ள முகமுள்ளவளும், தயை நிறைந்த கண்கள் உள்ளவளும், கைகளில் பாசம் அங்குசம், கரும்புவில், பஞ்சபாணங்கள், அமிருதம் நிறைந்த ரத்னபாத்ரம், வரமுத்ரை இவைகளோடு கூடியவளுமாக விளங்குகிறாள். இவ்வாறு காமேச்வரீ நித்யையை த்யானிக்க வேண்டும்.

॥ भगमालिनी नित्या ॥

ध्यानम् ॥

अरुणामरुणाकल्पां सुन्दरीं सुस्मिताननाम् ।
त्रिनेत्रां बाहुभिः षड्भिरुपेतां कमलासनाम् ॥ १ ॥

कल्हारपाशपुण्ड्रेक्षुकोदण्डान्वामबाहुभिः ।
दधानां दक्षिणैः पद्ममङ्कुशं पुष्पसायकम् ॥ २ ॥

तथाविधाभिः परितो वृतां शक्तिगणैस्तुतैः ।
अक्षरोत्थाभिरन्याभिः स्मरोन्मादमदात्मभिः ॥ ३ ॥

पञ्चत्रिंशच्छतार्णैस्तैः रूपिणी शक्तिपञ्चकम् ।
सप्ताक्षरीं च संयोज्य शक्तीस्तत्सङ्ख्यका यजेत् ॥ ४ ॥

பகமாலினீ நித்யையானவள் சிவந்த நிறமுள்ளவளும், சிவப்பான ஆபரணங்களுள்ளவளும், அழகுள்ளவளும், சிரித்த முகமும், முக்கண்களும், ஆறு கைகளுமுடையவளும், தாமரைப் பூவில் வீற்றிருப்பவளும், இடது கைகளில் கல்ஹார புஷ்பம், கயிறு, கரும்பு வில்லு, வலது கரங்களில் பத்மம், அங்குசம், புஷ்ப பாணம், இவைகளைத் தரிப்பவளும், அக்ஷரங்களிலிருந்து உண்டானவர்களாய், மன்மதவிகாரம், செறுக்கு இவைகளோடும், தன்னைப்போன்ற கரங்கள் ஆயுதங்கள் முதலியவைகளோடுமுள்ளவர்களான சக்திக் கூட்டங்களால் சூழப்பட்டும் விளங்குகின்றனள்.

॥ नित्यक्लिन्ना नित्या ॥

ध्यानम् ॥

अरुणामरुणाकल्पामरुणांशुकधारिणीम् ।
अरुणास्रग्विलेपां तां चारुस्मेरमुखाम्बुजाम् ॥ १ ॥

नेत्रत्रयोल्लसद्वक्त्रां भाले घर्माम्बुमौक्तिकैः ।
विराजमानां मन्दारलसदर्धेन्दु शेखराम् ॥ २ ॥

2

चतुर्भिर्बाहुभिः पाशमङ्कुशं पानपात्रकम् ।
अभयं बिभ्रतीं पद्ममध्यासीनां मदालसाम् ॥ ३ ॥

நித்யக்லின்னா நித்யையானவள், சிவந்த உடலும், சிவந்த ஆபரணமும், சிவந்த உடையும், சிகப்புச்சந்தனப்பூச்சும், அழகிய சிரித்த முகமும், முக்கண்களும், நெற்றியில் வியர்வைக் கொப்பான முத்துஸாத்தை யணிந்தவளும், மந்தார புஷ்பத் தோடு விளங்கும், அர்த்த சந்திரனைத் தலையில் தரிப்பவளும், நான்கு கைகளில் பாசம், அங்குசம், பான பாத்திரம், அபய முத்திரை இவைகளை யுடையவளும், மதத்துடன் தாமரை மத்தியில் வீற்றிருப்பவளுமாக விளங்குகிறாள்.

४ ॥ भेरुण्डा नित्या ॥

ध्यानम् ॥

तप्तकाञ्चनसङ्काशदेहां नेत्रत्रयान्विताम् ।
चारुस्मिताञ्चितमुखीं दिव्यालङ्कारभूषिताम् ॥ १ ॥

ताटङ्कहारकेयूर रत्नवलकमण्डिताम् ।
रशनानूपुरोर्म्यादि भूषणैरतिसुन्दरीम् ॥ २ ॥

पाशाङ्कुशौ चर्मखड्गौ गदावज्रधनुःशरान् ।
करैर्दधानामासीनां पूजायामन्यदा स्थिताम् ॥ ३ ॥

शक्तीश्च तत्समाकारतेजोहेतिभिरन्विताः ।
पूजयेत्तद्वदभितः स्मितः सौम्यमुखः सदा ॥ ४ ॥

பேருண்டா நித்யையானவள், உருக்கின தங்கத்திற்கொப்பான தேஹ காந்தியுள்ளவளும், மூன்று நேத்ரங்களுள்ளவளும், மந்தஹாஸமுடையவளும், மேன்மையான ஆபரணங்களால் அலங்கரிக்கப்பட்டவளும், காதோலை, கழுத்துச்சங்கிலி, கை வளையல், ஒட்யாணம், பாதஸரம், மோதிரம், ரத்னமயமான வஸ்திரம் இவைகளால் மிக்கச் சோபையுள்ளவளும், கரங்களில் பாசம், அங்குசம், கேடயம், கட்கம், கதை, வஜ்ராயுதம், வில், அம்புகள், இவைகளைத் தரித்தவளும், தனக்

கொப்பான ரூபமும் தேஜஸும் கூடிய சக்திகளால் சூழப்பட்டவளும், பூஜா காலத்தில் உட்கார்ந்திருப்பவளாகவும், மற்ற காலங்களில் நின்றுகொண்டிருப்பவளாகவும் விளங்குகிருள். சக்திகளுடன் கூடிய இத்தேவியை எப்போதும் சிரிப்புடன் கூடிய தெளிந்தமுகமுள்ளவளுய் பூஜிக்கவேண்டும்.

५ ॥ वह्निवासिनी नित्या ॥

ध्यानम् ॥

तप्तकाञ्चनसङ्काशां नवयौवन सुन्दरीम् ।
चारुस्मेर मुखांभोजां विलसन्नयनत्रयाम् ॥ १ ॥

अष्टाभिर्बाहुभिर्युक्तां माणिक्याभरणोज्ज्वलाम् ।
पद्मरागकिरीटांशु संभेदारुणिताम्बराम् ॥ २ ॥

पीतकौशेयवसनां रत्नमञ्जीर मेखलाम् ।
रत्नमौक्तिकसंभिन्नस्तबकाभरणोज्ज्वलाम् ॥ ३ ॥

रक्ताब्जकम्बुपुण्ड्रेक्षुचाप पूर्णेन्दुमण्डलाम् ।
दधानां बाहुभिर्वामैः कल्हारं हेमशृङ्गकम् ॥ ४ ॥

पुष्पेषुं मातुलिङ्गं च दधानां दक्षिणैः करैः ।
स्वसमानाभिरभितः शक्तिभिः परिवारिताम् ॥ ५ ॥

வன்னிவாஸினீ நித்யையானவள், உருக்கின தங்கத்திற் கொப்பான மேனியுள்ளவளும், இளம் வயதிற்குப்பொருந்திய அழகும், அழகுள்ள சிரிப்பு முகமும், முக்கண்களும், எட்டுக் கைகளும், மாணிக்கக் கற்களால் இழைக்கப்பட்ட நகைகளால் அதிக சோபையுள்ளவளும், ஒளி வீசும் பத்மராகக் கற்கள் பதிந்த கிரீடத்தைத் தரித்தவளும், பீதாம்பரமு (மஞ்சள் பாவாடையு) டுத்தினவளும், ரத்ன மயமான கால்நகைகள், இடுப்பில் ஒட்டியாணம், ரத்னம் முத்து இவைகளாலான ஆபரணங்கள் இவைகளால் அதிகமான சோபையுள்ளவளும், இடது கைகளில் செந்தாமரைப்புஷ்பம், சங்கு, செங்கரும்புவில், பூர்ண சந்திரனும், வலதுகைகளில் கல்ஹார புஷ்பம், தங்கக்கொம்பு,

புஷ்பபாணங்கள், மாதுலிங்கம் (மாதுளை) இவைகளைத் தரிப்ப பவளும், தனக் கொப்பான சக்திகளால் சூழப்பட்டிருப்பவளு மாக விளங்குகிருள்:

६ ॥ महावज्रेश्वरी नित्या ॥

ध्यानम् ॥

रक्तां रक्ताम्बरां रक्तगन्धमालाविभूषणाम् ।
चतुर्भुजां त्रिनयनां माणिक्य मुकुटोज्ज्वलाम् ॥ १ ॥

पाशाङ्कुशाविक्षुचापं दाडिमी सायकं तथा ।
दधानां बाहुभिर्नित्यैः दयादम(पर)सुशीतलैः ॥ २ ॥

पश्यन्ती साधकं त्र्यश्र षट्कोणाब्ज महीपुरे ।
चक्रमध्ये सुखासीनां स्मेरवक्त्रसरोरुहाम् ॥ ३ ॥

शक्तिभिः स्वस्वरूपाभिरावृतां पोतमध्यगे ।
सिंहासनेऽभितः प्रेङ्खत्पोतस्थाभिः स्वशक्तिभिः ॥ ४ ॥

वृत्तान्ताभिर्विनोदानि यातायातादिभिः सदा ।
कुर्वाणामरुणांभोधौ चिन्तयेन्मन्त्र(वज्र)नायिकाम् ॥ ५ ॥

மஹாவஜ்ரேச்வரீ நித்யையானவள், முக்கோணம், அறு கோணம், தளம், பூபுரம் இவ்விதமான யந்திரத்தின் நடுவே ஸிம் ஹாஸனத்தில் ரக்த மேனியும், சிவந்த வஸ்திரமும், செஞ் சந் தனப்பூச்சும், சிகப்புமாலையும், நான்கு கைகளும், மூன்று கண் களும், மாணிக்கக் கிரீடமும், கைகளில் பாசமும், அங்குசமும், கரும்புவில்லும், மாதுளைபுஷ்பபாணமும், பக்தனிடம் குளிர்ந்த பார்வையோடும், தனது சக்தியால் உண்டான தன் போன்ற சக்திகளால் சூழப்பட்டு ஆடுகின்ற ஸ்வர்ண படகு மத்தியில் ஸுகமாக வீற்றிருக்கின்றுள். இவ்விதமாக இத்தேவியைத் தியானித்துப் பூஜிக்கவேண்டும்.

७ ॥ शिवदूती नित्या ॥

ध्यानम् ॥

निदाघकालमध्याह्न दिवाकरसमप्रभाम् ।
नवरत्न किरीटां च त्रीक्षणामरुणाम्बराम् ॥ १ ॥

नानाभरणसंभिन्न देहकान्तिविराजिताम् ।
शुचिस्मितामष्टभुजां स्तूयमानां महर्षिभिः ॥ २ ॥

पाशं खेटं गदां रत्नचषकं वामबाहुभिः ।
दक्षिणैरङ्कुशं खड्गं कुठारं कमलं तथा ॥ ३ ॥

दधानामाधु(नां साधः?)काभीष्ट दानोद्यम समन्विताम् ।
ध्यात्वैवं पूजयेद्देवीं दूतीं दुर्नीतिनाशिनीम् ॥ ४ ॥

சிவதூதி நித்யையானவள் கோடைகாலத்தின் நடுப்பகல் சூரியனுக்கொப்பானகாந்தியுடையவளும், நவரத்னக்கிரீடமும், முக்கண்களும், சிவந்த வஸ்திரமுள்ளவளும், அநேகவிதமான ஆபரணங்களினல் அதிக தேக காந்தியுடையவளும், மகரிஷிகளால் போற்றப்படுகின்றவளும், மாசற்ற புன்னகை உடையவளும், எட்டுக்கைகள் உள்ளவளும், வலது கரங்களில் பாசம், கேடயம், கதை, ரத்ன கிண்ணமும், இடது கரங்களில் அங்குசம், கட்கம், கோடரி, தாமரை இவைகளுள்ளவளும், அநீதியைத் தொலைப்பவளும், விரும்பியவற்றை அளிப்பவளுமாக விளங்குகின்றுள். இவ்விதமாக இத்தேவியைத் தியானித்து பூஜை செய்யவேண்டும்.

८ ॥ त्वरिता नित्या ॥

ध्यानम् ॥

श्यामवर्णां शुभाकारां नवयौवनशोभिनीम् ।
द्विद्विक्रमादष्टनागैः कल्पिताभरणोज्ज्वलाम् ॥ १ ॥

ताटङ्कमङ्गदं तद्वद्रशनानूपुरान्वितैः ।
विप्रक्षत्रियविट्शूद्रजातिभिर्भीमविग्रहैः ॥ २ ॥

पल्लवांशुकसंवीतां शिखिपुच्छकृतैः शुभैः ।
वलयैर्भूषितभुजां माणिक्यमुकुटोज्ज्वलाम् ॥ ३ ॥

बर्हिबर्हकृतापीडां तच्छत्रां तत्पताकिनीम् ।
गुञ्जागुणलसद्वक्षःकुचकुङ्कुममण्डनाम् ॥ ४ ॥

त्रिनेत्रां चारुवदनां मन्दस्मितमुखाम्बुजाम् ।
पाशाङ्कुशवराभीति लसद्भुज चतुष्टयाम् ॥ ३ ॥

த்வரிதா நித்யையானவள், கார்முகில்போல மேனியுடைய
வளும், ஜடாமான தேஹத்தையுடையவளும், இளம்பிராயமுள்
ளவளும், முக்கண்களுள்ளவளும், மந்தஹாஸமுள்ளவளும்,
நான்கு வகைப்பட்ட (ப்ராம்மண, க்ஷத்திரிய, வைசிய, சூத்ரர்
என்னும் நான்குஜாதி ஸர்ப்பங்கள்) எட்டுக் கொடிய நாகங்
களை இடுப்பு, பாதம், புஜம், காது இவைகளில் இரண்டு இர
ண்டாக பூஷணங்களாக உடையவளும், தளிர்மயமான வஸ்திர
முடுத்தியவளும், அழகான மயில்தோகைகளால் ஆக்கப்பட்ட
கைவளை யல்களையுடையவளும், மாணிக்கக் கிரீடம், மயில்
தோகைகளால் ஆன குடை த்வஜம் இவைகள் உள்ளவளும்,
குந்துமணிமாலையை அணிந்தவளும், செஞ்சந்தனப் பூச்சுடை
யவளும், நான்கு கைகளிலும், முறையே பாசம், அங்குசம்,
அபய-வரத-முத்திரை இவைகளோடு கூடியவளுமாக விளங்
குகிறாள்.

९. ॥ कुलसुन्दरीनित्या ॥

ध्यानम् ॥

लोहितां लोहिताकार शक्तिबृन्दनिषेविताम् ।
लोहितांशुकभूषास्रग्लेपनां षण्मुखाम्बुजाम् ॥ १ ॥

प्रतिवक्त्रं त्रिनयनां तथा चारुस्मितान्विताम् ।
अनर्घ्यरत्नघटित माणिक्य मुकुटोज्ज्वलाम् ॥ २ ॥ अनर्घ्य

ताटङ्कहारकेयूररशनानूपुरोज्ज्वलाम् ।
रक्तस्तबकसंभिन्न लसद्वक्षस्थलां शुभाम् ॥ ३ ॥

कारुण्यानन्दपरमामरुणाम्बुजविष्टराम् ।
भुजैर्द्वादशभिर्युक्तां सर्वेषां सर्ववाङ्मयीम् ॥ ४ ॥

प्रवालाक्षस्रजं पद्मं कुण्डिकां रत्ननिर्मिताम् ।
वसुपूर्णं तच्चषकं लुङ्गीव्याख्यानमुद्रिकाम् ॥ ५ ॥

दधानां दक्षिणैर्वामैः पुस्तकं चारुणोत्पलम् ।
हैमीं च लेखनीं रत्नमालां कम्बुवरं भुजैः ॥ ६ ॥

अभितः स्तूयमानां च देवगन्धर्वकिन्नरैः ।
यक्षराक्षसदेवर्षिसिद्धविद्याधरादिभिः ॥ ७ ॥

ध्यात्वैवमर्चयेन्नित्यं वाक्लक्ष्मीकान्तिसिद्धये ।
सितां केवलवाक्सिद्धौ लक्ष्म्यै हेमप्रभामपि ॥ ८ ॥

धूमाभां वैरिविद्विष्टयै मृतये निग्रहाय च ।
नीलां च मूकीकरणेतां स्मरेत्तदपेक्षया ॥ ९ ॥

குலஸௌந்தரீ நித்யையானவள், செந்நிற மேனியை உடையவளும், செந்தாமரை மலரில் வீற்றிருப்பவளும், செந்நிறமான, ஆடை, ஆபரணாதிகள், செஞ்சந்தனப்பூச்சு, சிகப்பு மாலை இவைகளுடன் கூடியவளும், செந்நிறமுள்ள சக்திகளால் சூழப்பட்டவளும், பக்தர்களுக்கு அபயமளிக்கும் கருணை, ஆனந்தம் ததும்பும் ஆறுமுகங்கள் உடையவளும், ஒவ்வொரு முகத்திலும் முக்கண்ணோடும், பன்னிருகைகளுடனும், விலையுயர்ந்த மாணிக்கக் கிரீடங்களோடும் கூடியவளும், தோடு, ஹாரம், கேயூரம், (தோள்வளைகள்) ஒட்யாணம், கால் காப்பு இவைகளோடு பிரகாசிப்பவளும், வலது கரங்களில் பவழ மாலை, தாமரை, ரத்ன கமண்டலு, தனம் நிரம்பிய ரத்னக்கிண்ணம், மாதுலங்கை, ஞானமுத்ரை இவைகளையும், இடது கரங்களில் புஸ்தகம், செந்தாமரை, தங்க எழுத்தாணி, ரத்னமாலை, சங்கு, வரமுத்ரை இவைகளையும் உடையவளும், தேவர் வித்யாதரா முதலியவர்களால் சூழப்பட்டு ஸ்துதி செய்யப்படுபவளுமாய் விளங்குகிறாள். வாக்ஸித்திக்காக வெண்ணிறமுள்ளவளாகவும், தனத்திற்காக தங்கமேனியுள்ளவளாகவும், த்வேஷிப்பவர்களின் நாசத்திற்காகவும், அடக்குவதற்காகவும், புகை நிறமுள்ளவளாகவும், அவர்களை ஊமையாக்கும் விஷயத்தில் கருநிறமுள்ளவளாகவும், அல்லது நீலநிறமுள்ளவளாகவும் தியானிக்கவேண்டும்.

१० ॥ नित्या नित्या ॥

ध्यानम् ॥

व्यापकं च समस्तेन विधाय विधिना युतम् ।
ध्यायेत् समस्त संपत्तिहेतोः सर्वात्मिकां शिवाम् ॥ १ ॥

उद्यद्भास्करबिम्बास्यां माणिक्यमकुटोज्ज्वलाम् ।
पद्मरागकृताकल्पामरुणांशुकधारिणीम् ॥ २ ॥

चारुस्मित लसद्वक्त्र षट्सरोजविराजिताम् ।
प्रतिवक्त्रं त्रिनयनां भुजैर्द्वादशभिर्युताम् ॥ ३ ॥

पाशेक्षुगुणपुण्ड्रेक्षु चापखेट त्रिशूलकान् ।
वहन्तीं वरदां वामैरङ्कुशं पुस्तकं तथा ॥ ४ ॥

पुष्पेषुमण्डलाग्रञ्च नृकपालाभये तथा ।
दधानां दक्षिणैर्हस्तैर्ध्यायेद्देवीमनन्यथा ॥ ५ ॥

நித்யா நித்யையானவள், தன்னுடைய ப்ரேரணையில் எல்லா ஜீவராசிகளும் அந்தந்த சரீரத்தில் இருக்கவைத்து அந்தந்த கர்மாக்களுக்குத் தகுந்தபடி ஆட்டிவைக்கின்றாள். அவள் உதய சூரிய பிம்பம்போலுள்ளவளும், மாணிக்க மகுடம் தரிப்பவளும், சிவந்த வஸ்திரமும், பத்மராக ஆபரணங்களும் பூண்டவளும், அழகிய புன்சிரிப்பு முகமுள்ளவளும், ஆறுமுகம், பன்னிரு கைகளுள்ளவளும், ஒவ்வொரு முகத்திலும் முக்கண்கள் உள்ளவளும், இடதுகரங்களில் பாசம், வெண்தாமரை கரும்பு வில், கேடயம், சூலம், வரமுத்ரை இவைகளைத் தரிப்பவளும், வலது கரங்களில் அங்குசம், புஸ்தகம், புஷ்ப பாணங்கள், வளைந்த கத்தி, கபாலம், அபய முத்ரை இவைகளைத் தரிப்பவளுமாக விளங்குகிறாள்.

११ ॥ नीलपताका नित्या ॥

ध्यानम् ॥

इन्द्रनीलनिभां भास्वन्मणिमौलिविराजिताम् ।
पञ्चवक्त्रां त्रिनयनामरुणांशुक धारिणीम् ॥ १ ॥

दशहस्तां लसन्मुक्ताप्रायाभरणमण्डिताम् ।
रत्नस्तबकसंभिन्नदेहां चारुस्मिताननाम् ॥ २ ॥
पाशं पताकां चर्माणि शार्ङ्गचापं वरं करैः ।
दधानां वामपार्श्वस्थैः सर्वाभरणभूषितैः ॥ ३ ॥
अङ्कुशं च ततः शक्तिं खड्गं बाणं तथाभयम् ।
दधानां दक्षिणैर्हस्तैरासीनां पद्मविष्टरे ॥ ४ ॥
स्वाकारवर्णवेषास्यपाण्यायुधविभूषणैः ।
शक्तिवृन्दैर्वृतां ध्यायेद्देवीं नित्यार्चनक्रमे ॥ ५ ॥

நீலபதகா நித்யையானவள், இந்திர நீலக் கல்போன்ற மேனியுள்ளவளும், புன்சிரிப்போடுகூடிய ஐந்துமுகங்களுள்ளவளும், ஒவ்வொரு முகத்திலும் மூன்று நேத்திரங்களை உடையவளும், பத்துக்கைகளையும், சிவந்த உடையையும் தரித்தவளும், ரத்னாபரணங்கள், முத்துமாலைகள், பவழமாலைகள் அணிந்தவளும், தேஹங்களின் பல பாகங்களில் ரத்ன குஞ்சலங்கள் தரித்தவளும், தேவியின் இடது புஜங்களில் முறையே பாசம், த்வஜம், கேடயம், கொம்பிலான வில், வரமுத்திரையையும், வலது புஜங்களில் முறையே அங்குசம், சக்தியாயுதம், கட்கம், பாணம், அபயமுத்திரையையும் தரிப்பவளுமான தேவி தன்னைப்போன்ற பல சக்திகள் சூழ தாமரையில் வீற்றிருக்கிறாள்.

१२ ॥ विजया नित्या ॥

ध्यानम् ॥

पञ्चवक्त्रां दशभुजां प्रतिवक्त्रं त्रिलोचनाम् ।
भास्वन्मुकुटविन्यस्त चन्द्ररेखाविराजिताम् ॥ १ ॥
सर्वाभरणसंयुक्तां पीताम्बर समुज्ज्वलाम् ।
उद्यद्भास्वद्बिम्ब तुल्यदेहकान्ति शुचिस्मिताम् ॥ २ ॥
शङ्खं पाशं खेटचापौ कल्हारं वामबाहुभिः ।
चक्रं तथाङ्कुशं खड्गं सायकं मातुलङ्गकम् ॥ ३ ॥

दधानां दक्षिणैर्हस्तैः प्रयोगे भीमदर्शनाम् ।
उपासनेऽतिसौम्यां च सिंहोपरि कृतासनाम् ॥ ४ ॥
व्याघ्रारूढाभिरभितः शक्तिभिः परिवारिताम् ।
समरे पूजनेऽन्येषु प्रयोगेषु सुखासनाम् ॥ ५ ॥
शक्तयश्चापि पूजायां सुखासनसमन्विताः ।
सर्वा देव्या समाकार मुखपाण्यायुधान्य(अ?)पि ॥ ६ ॥

விஜயா நித்யையானவள், உதயகால சூரியகாந்திக்கு ஒப்பான தேக காந்தி உடையவளும், ஒவ்வொரு முகத்திலும் மூன்று கண்ணுள்ள ஐந்து அழகிய முகங்களும், பத்துக் கரங்களுள்ளவளும், பீதாம்பரம் தரித்தவளும், தலைகளில் பிரகாசமான ஐந்து கிரீடங்களுள்ளவளும் சந்திரகலை தரித்தவளும், பலவித ரத்ன ஆபரணங்களால் அலங்கரிக்கப்பட்டவளும், இடது புஜங்களில் சங்கு, பாசம், கேடயம், வில், கல்ஹார புஷ்பமும், வலது புஜங்களில் சக்ரம், அங்குசம், பாணம், மாதுளங்கம், கட்கமும் உள்ளவளும், தன்னைப்போன்ற ஆபரணங்கள், ஆயுதங்கள் தரித்த அநேக சக்திகளால சூழப்பட்டவளாகவும் விளங்குகிறாள்.

1. ஜயம் பெற:— பயங்கர ரூபிணியாக உபாஸிக்க வேண்டும்.

2. நித்யபூஜைக்கு:— ஸௌம்யமூர்த்தியாக உபாஸிக்க வேண்டும்.

3. ஸமரப்பிரயோகத்துக்கு:— இத்தேவியை ஸிம்ஹாஸனத்தில்மேல் வீற்றிருப்பவளாகவும், தேவியைச் சூழ்ந்த சக்திகளை வியாக்ராரூடர்களாகவும் பூஜை செய்யவேண்டும். (ஸமரம்-சண்டை.)

4. இதரப் பிரயோகங்களுக்கு:- ஸுகாஸனத்தில் வீற்றிருப்பவளாகவும், அவளுடைய சக்திகளும் அவ்விதமே வீற்றிருப்பனவாகவும் உபாஸிக்கவேண்டும்.

१३ ॥ सर्वमङ्गला नित्या ॥

ध्यानम् ॥ सुवर्णवर्णरुचिरां मुक्तामाणिक्यभूषणाम् ।
माणिक्यमुकुटां नेत्रद्वयप्रेङ्खदयाभराम् ॥ १ ॥

द्विभुजां स्वासनां पद्मे त्वष्टषोडशतत्द्वयैः ।
पत्रैरुपेते स चतुर्द्वारभूसद्मयुग्मगे ॥ २ ॥
मातुलङ्गफलं दक्षे दधानां करपङ्कजे ।
वामेन निजभक्तानां प्रयच्छन्तीं धनादिकम् ॥ ३ ॥
स्वसमानाभिरभितः शक्तिभिः परिवारिताम् ।
षट्सप्ततिभिरन्याभिरक्षरोत्थाभिरन्विताम् ॥ ४ ॥

ஸர்வமங்களா நித்யையானவள், அஷ்ட தளங்கள், பதினாறு தளங்கள், முப்பத்திரண்டு தளங்களுடன், நான்கு பக்கங்களிலும் கதவுகளுள்ள பூபுரத்தை உடைய தாமரையின் மத்தியில் தங்க மேனியுடன் மாதுளை, அபயமுத்திரையுடைய இரண்டு கரங்களையும், தயை நிறைந்த ஸோம ஸூர்யர்களாகிய நேத்திரங்களையும் உடையவளும், விலையுயர்ந்த சிகப்பு ரத்னாபரணங்கள் அணிந்தவளும், சிரஸில் சிகப்பு ரத்ன மகுடமணிந்தவளுமான இத்தேவி தனக்குச் சமானமான பல சக்திகளுடனும், ஸோம ஸூர்யாக்னிக்கு ஒப்பான ரூபமுள்ள 76-அக்ஷர சக்திகள் சூழப் பிரகாசிக்கின்றாள்.

१४ ॥ ज्वालामालिनी नित्या ॥ ✓

ध्यानम् ॥ ज्वलज्ज्वलनसङ्काशां माणिक्य मुकुटोज्ज्वलाम् ।
षड्वक्त्रां द्वादशभुजां सर्वाभरणभूषिताम् ॥ १ ॥
पाशाङ्कुशौ खड्ग खेटौ चापबाणौ गदाधरौ ।
शूलवह्नी वराभीती दधानां करपङ्कजैः ॥ २ ॥
स्वसमानाभिरभितः शक्तिभिः परिवारिताम् ।
चारुस्मितलसद्वक्त्र सरोजां त्रीक्षणान्विताम् ॥ ३ ॥

ஜ்வாலாமாலினியானவள், இனிமையான புன்சிரிப்புள்ள 6 முகங்கள், 12 கைகள், மாணிக்கங்கள் இழைத்த கிரீடங்கள், ஸகலமான ஆபரணங்களிவைகளோடு கூடியவளும், கொழுந்து விட்டெரியும் அக்னிபோன்ற மேனியை உடையவளும், வாம கரங்களில் பாசம், கத்தி, வில், கதை, சூலம், வரமுத்திரையை

யும், வலதுகரங்களில் அங்குசம், கெடயம், பாணம், ஆழை, மழு, அபயமுத்திரையும் தரித்தவளும், தனக்குச் சமானமான மூன்று கண்ணுள்ள புன்சிரிப்புள்ள முகங்களையுடைய அனேகவித சக்திகளால் சூழப்பட்டும் விளங்குகிறாள்.

१५ ॥ चित्रा नित्या ॥

ध्यानम् ॥

उद्यदादित्य बिम्बाभां नवरत्नविभूषिताम् ।
नवरत्नकिरीटाञ्च चित्रपट्टांशुकोज्ज्वलाम् ॥ १ ॥
चतुर्भुजां त्रिनयनां शुचिस्मितलसन्मुखीम् ।
सर्वानन्दमयीं नित्यां समस्तेप्सितदायिनीम् ॥ २ ॥
चतुर्भुजां भुजैः पाशमङ्कुशं वरदाभये ।
दधानां मङ्गलापद्मकर्णिकानवयोनिगाम् ॥ ३ ॥

சித்ராநித்யையானவள், உதய ஸூரியபிம்பத்துக்கு ஒப்பான காந்தி உள்ளவளும், நவரத்னமய கிரீடமணிந்தவளும், நவரத்னபூஷணங்கள் பூண்டவளும், நான்கு கரங்களுள்ளவளும், மூன்று நேத்ரங்களை உடையவளும், விசித்திரமான பல வர்ண பட்டாடையணிந்தவளும், புன்சிரிப்போடுகூடிப் பிரகாசிக்கின்ற முகமுடையவளும், ஸர்வானந்தமயமானவளும், எப்போதும் நித்யையானவளும், கோரிய வரங்களை அளிப்பவளும், நான்கு கரங்களிலும் பாசம், அங்குசம், வரம் அபயமுத்திரைகளும் உடையவளாக விளங்குகிறாள்.

१६ ॥ महानित्या नित्या ॥

॥ श्रीललितापरमेश्वरी ॥

ध्यानम् ॥

कल्पकोद्यानमृतुभिः षड्भिः सेवितविग्रहम् ।
तन्मध्येऽसंख्यरूपाभिर्वृतां सङ्गीतशक्तिभिः ॥ १ ॥
गीतवादित्रनृत्यादिसंसक्ताभिरनारतम् ।
विनोद्यमानां विलसन्मदमन्थरवीक्षणाम् ॥ २ ॥

रत्नमण्डपमध्यस्थरत्नसिंहासनोपरि ।
शुचिस्मितां शक्तिवृन्दगीताकर्षणनन्दिताम् ॥ ३ ॥
सहजासवसम्भोगैः सञ्जातानन्दविग्रहाम् ।
दयामदारुणापाङ्गविलोकितसुसाधकाम ॥ ४ ॥
परितो भूषणैश्चित्रैः स्वर्णचामरकादिभिः ।
विराजमानान्द्विरदानश्वानपि तथाविधान् ॥ ५ ॥
शक्तिभिर्दर्शितानग्रे पश्यन्तीमभितोत्सवाम् ।
स्वसमानाभिरभितो नित्याभिःसेवितान्तथा ॥ ६ ॥
याति तासां पूजयिता तत्समाकारतां शनैः ।
तद्दिनोदस्तत्समीपनिवासी स्यात् सुनिश्चितम् ॥ ७ ॥

ஏகையாயும், தனக்கு மேலொருவரும் இல்லாதவளாயும், இரண்டற்றவளாயும், ஜ்யோதி: ஸ்வரூபமாயும், அவ்யாஜ கருணாமூர்த்தியாயுமுள்ள லலிதாபரமேச்வரியானவள், ஆறு ருதுக்கள் எப்போதும் இருக்கின்றதான கல்பக உத்யான வனத்தில் நடுவே கணக்கிலடங்கமுடியாத ஸங்கீதம், வாத்யம், ஆட்டம் முதலியவைகளில் எப்போதும் ஈடுபட்ட ஸங்கீத சக்திகளால் சூழப்பட்டவளாயும், பிரகாசிக்கின்ற மதத்தோடுகூடிய பார்வையுள்ளவளும், அழகிய புன்சிரிப்புள்ளவளும், ரத்ன மண்டபத்தின் மத்தியில் இருக்கும் ரத்னஸிம்ஹாஸனத்தில் அமர்ந்துகொண்டு சக்திக் கூட்டங்களால் பாடப்படுகின்ற ஸங்கீதங்களைக் கேட்பதில் ஆவலுள்ளவளாயும், ஆஸவம், சேர்க்கை இவைகளாலுண்டான ஆனந்தமுடையவளும், ஸாதகர்களைத் தயையுடனும் ஆதரவுடனும் சிவந்த கடைக்கண் பார்வையால் நோக்குபவளும், பலவித ஆபரணங்கள், ஸ்வர்ண சாமரங்கள் இவைகளோடு கூடிய யானைகளையும் குதிரைகளையும் பார்த்துக்கொண்டு ஸந்தோஷிப்பவளும், பலவித சக்திகளால் சூழப்பட்டவளும், தன்னைப்போன்ற நித்யை தேவதைகளால் நான்கு பக்கங்களிலும் சூழப்பட்டவளுமாக எல்லாவற்றிற்கும் ஸாக்ஷிபூதையாய் இருந்துகொண்டும் விளங்குகிறாள்.

इति षोडशनित्यातन्त्रेषु श्रीकादिमते तन्त्रराजे उमामहेश्वरसंवादे
षोडशनित्यास्तोत्रं संपूर्णम् ॥

Dyana Slokas.

॥ कामेश्वरी नित्या ॥ Kameshvari Nitya

1. "She is (lustrous red) like ten million rising suns, wears a bright crown of rubies and is adorned with throat ornament (Graiveya), necklaces, waist-chains and rings on Her hands and feet. Her ornaments are set with gems. Her raiment is red. She is six-armed and three-eyed and carries the crescent (Kala) of the Moon on Her head. Her face is lit up with a soft smile and Her eyes are merciful. She is in Her Chakra or Yantra which is on a lotus. She carries in Her hands a bow of sugarcane, arrows of flowers, noose and goad and a cup made of gems filled with nectar. She makes the gesture granting boons"

॥ भगमालिनी नित्या ॥ Bhagamalini Nitya

2. "She is beautiful and red, of smiling countenance, three-eyed, six-armed, seated on a lotus. She carries the night-water-lily, noose, sugarcane bow in Her left hands, in the right hands she holds a lotus, a goad, and flowery arrows. She is surrounded by Shaktis on all sides like Herself."

। नित्यक्लिन्ना नित्या ॥ Nitya Kilinna Nitya

3. "She is red with red raiment and smeared with red sandal-paste. She smiles. Three eyes enhance the beauty of Her face. On Her forehead are beads of sweat shining like pearls. Above it is the half-moon. In Her four hands she holds the noose, goad, drinking cup, and with the last hand makes the gesture dispelling fear. She is seated in the middle of the lotus, listless with desire." (Madalasa.)

॥ भेरुण्डा नित्या ॥ Bherunda Nitya

4. "Her body is like molten gold. She has three eyes and Her face is lit with smiles. She is adorned with ornaments of celestial beauty, with earrings, necklace, armlets, waiste-chain and rings on hands and feet. She carries the noose, goad, shield, sword, mace and thunderbolt (Vajra) and bow."

॥ वह्निवासिनी नित्या ॥ Vahnivasini Nitya

5. "With the beauty of early youth She is lustrous like burning gold. Her lotus face with three eyes is lit by a gentle smile. She is eight armed and dressed in yellow silk with ruby ornaments. Such is the strength of the rays of the rubies on Her diadem that they make ruddy the surrounding region. Her radiance is enhanced by anklets and waist-chain of gems, pearls and other ornaments making clusters of jewels. In Her left hands She holds a red lotus, a conch, a bow of red sugarcane and the full moon and in Her right hands a white water lily, a golden horn. flowery arrows and a citron (Matulungga). She is surrounded on all sides by Shaktis like unto Her."

॥ महावज्रेश्वरी नित्या ॥ Vajreshvari Nitya

6. "She is seated at Her ease on Her Chakra (Yantra) consisting of a triangle, hexagon, lotuses and Mahipura (Bhupura) placed on a throne (Singhasana). She is seated on this throne in a golden boat flowing in an ocean of blood. She has four arms and three eyes. She is red, attired in red raiment, surrounded with red unguent and garlended with red flowers. On Her head is a diadem of lustrons rubies. In Her hands She carries noose, goad, sugarcane bow and arrows of pomegranate flowers. She looks upon Her Sadhaka with the cooling gaze of mercy. Her lotus face being in smiles. She is surrounded in the boat, which is swaying, by Shaktis unto Her."

॥ शिवदूती नित्या ॥ Shivaduti Nitya

7. "She has eight arms and three eyes and is bright like the midday sun in summer. She is garbed in red raiment and wears various kinds of ornaments on different parts of Her body, which enhance its beauty There are nine gems in Her diadem. Her face smiles gently. The great Rishis are hymning Her praise. In Her left hands She carries a horn, shield (Kheta), mace, and cup (Chashaka) made of gems. In Her right hands She holds a goad, sword (Khadga) are (Kuthara) and a lotus. She is the Destroyer of wickedness and is eager to grant the pleasing objects of desire."

॥ त्वरिता नित्या ॥ Tvarita Nitya or Totala Devi

8 "She is of auspicious form in the first flush of youth and dark of colour. She has three eyes and four hands and Her beautiful lotus like face smiles gently. She is clad in new leaves. She is adorned with eight fierce and great serpents, of four kinds, and with waist chain and anklets. They are the four castes Vipra, Kshatriya, Vit (Vaishya) and Shudra. (The Manorama says that there are two of each castes and the ornaments should be understood as following the origination of each caste). On Her head is a crystal crown with a crest of peacock's feather. Her arms are adorned with bangles made of beautiful peacock's tail feathers These are also made up into an umbrella and banner Strings of gunja berries are round and on Her throat and breasts which are smeared with red (sandal). Smiling gently She holds in Her four hands noose and goad and makes the gesture (Mudra) of granting boon and dispelling fear."

॥ कुलसुन्दरी नित्या ॥ Kulasundari Nitya

9. "She is propitious, supremely kind, and blissfull with twelve arms and six lotus-like faces which smile sweetly and three eyes in each face. She is red, seated on a red lotus and is smeared with blood Her raiment and ornaments are red and is surrounded by Shaktis who are also red. Her crown is bright with gems beyond all price and rubies, earrings, neck-chains,

armlets, waist chains and anklets highten Her own brightness. On Her beautious breasts are clusters of red gems. In Her are all the words of the Vedas. In Her right hands She carries a rosary of coral beads, a lotus, a Kanaka (Kamandalu) made of gems a drinking cup (Chashaka) made of gems, full of wealth, a citron or lemon (Matulungga) and with one hand She makes the gesture of explanation (Vyakhyanamudra). In the left hands are a book, red lotus, a golden pen, a garland of gems, a conch shell. She makes the gesture of granting boons (Varamudra). She is surrounded by Devas, Gandharvas, Kinnaras who sing Her praises as also by Yakshas, Rakshasas and the like. So should She be moditated upon for the attainment of learning, wealth and beauty. When worshipped for the attainment of learning She is thought of as white, and when wealth is sought of Her, She is meditated upon as being of a golden colour."

॥ नित्या नित्या ॥ Nitya Nitya

10. All moving bodies are controlled by Her and by Her all Jivas dwell in their respective bodies She is beneficient and pervades all beings (Sarvatmika) for She is the Chaitanya in all. According to the Manorama She is the presiding Devata over Dakini and others who are the Shaktis of the bodily Dhatus. Coloured like the rising sun She bears on Her head a luminous crown. Her face is lit by a soft smile She is dressed in red raiment and adorned with rubies. She has three eyes and twelve hands. With Her right hands. She carries the noose, the white lotus, sugarcane bow, shield and trident and makes the gesture of granting favours (Varamudra); and in the left hands She carries the goad, book, flowery arrows, sword, skull and makes the gesture of dispelling fear (Abhayamudra) Her Shaktis are countless and form a complete circle."

॥ नीलपताका नित्या ॥ Nilapataka Nitya

11. "She is sapphire-blue in colour with five faces and three eyes in each, and ten hands. Her face is sweet and smiling. She is clad in red raiment and Her hand is adorned with lustrous gems. She is decked

mostly with pearls. Clusters of gems are on various parts of Her body. In her left hands She carries a noose, banner, shield, a bow made of horn and makes the gesture of granting gifts In Her right hands She carries the goad, the Shakti weapon, sword, arrows, and makes the gesture of dispelling fear. She is seated on a lotus and surrounded by a number of Shaktis resembling Herself."

॥ विजया नित्या ॥ Vigaya Nitya

12. "Her body is lustrous red like that of the rising sun. She has five smiling faces in each of which are three eyes and She has ten hands. Her raiment is yellow. She bears a brilliant crown and on Her forehead a crescent moon. She is decked with all kinds of ornaments. In Her left hands She carries conch, noose, shield. bow. and white lily (Kahlara) and in Her right hands discus (Chakra), goad (Anghusha). arrows (Sayaka), and a citron (Matulunga) fruit. According to the Prayoga when She is invoked for the purpose of victory in war and the like She is of terrific aspect but in daily worship Her aspet is benignant In Samaraprayoga She is meditated upon as seated on a lion and surrounded by Shaktis who are mounted on Tigers In other kinds of prayoga She is to be meditated upon as seated at Her ease (Sukhasana) surrounded by Shaktis similarly seated. Her Shaktis all resemble this Nitya and carry the same weapons."

॥ सर्वमङ्गला नित्या ॥ Sarvamangala Nitya

13. "She is of golden colour, decked with pearls and rubies and bears a ruby crown on her head. Her eyes full of mercy are Sun and Moon. She has two arms and is seated on a lotus which has (in its inner circle) eight petals (then in the middle circle) sixteen petals and (in its outer circle) thirty-two petals. This is surrounded by a Bhupura, square in shape with a door in each of the four sides In her right hand she holds a Matulunga (pomegranate or may be lemon) and with her left hand she gives wealth and the like to her devotees (i.e. by Vara-mudra) She is surrounded on all sides by her Shaktis who are like herself and by others 76 in number who have originated from the solar, lunar, and fiery letters.

॥ ज्वालमालिनी नित्या ॥ Jvalamalini Nitya

14. "She is lustrous like flaming fire and resplendent with her ruby crown. She has six faces and twelve arms and is decked with all kinds of adornment. She holds in her hands the Pasha (Noose), Angusha (Goad), Khadga (Sword), Khetaka (Shield) Chapa (Bow), Vana (Arrow) Gada (Mace), Dhara (Tortoise), Shula (Spear) and Vahni (Fire). With two hands she makes the gestures of granting boons (Vara) and dispelling fears (Abhiti-Abhaya). She is surrounded by her attendant Devatas who are like herself. Her lotus-like faces, each of which has three eyes, are illumined by a sweet smile."

॥ चित्रा नित्या ॥ Chitra Nitya

15. "She is herself lustrous like the rays of the rising sun, and is decked with jewels made of nine kinds of gems which are set also in her crown. She has four arms and three eyes and is clothed with a wonderful silken garment of variegated colour. A pure smile illumines her face. She is all bliss (Sarvanandamayi) and ever existent (Nitya) and she grants all desires. In her four arms she holds the noose (Pasha) the goad (Anghusha) and makes the gestures of granting boons and dispelling fear."

॥ महानित्या नित्या ॥ Lalita

16. "She is in the garden of Kalpa trees where all the six seasons prevail. She is surrounded by countless Shaktis of Music (Sangita-shakti) who are singing, playing on musical instruments and dancing. She is seated on a throne set with gems and in her eyes are seen her enjoyment of dancing and music. Her face is illumined with a pure smile. Her body shows the bliss which is had on partaking of the "Natural Wine" (Sahajasava). She regards with a kindly gaze good Sadhakas. Around her are elephants and horses decked with variegated clothing, golden fly whisks and the like. She is surrounded by other Nityas who are like into Herself."

ॐ

* ॥ ध्यानम् ॥

शुक्लपक्ष तिथि　　　　　　　　　　　　　　कृष्णपक्ष तिथि

१　　　　　श्री कामेश्वरी नित्या　　　　　१५

उत्तप्तहेमरुचिरं रविचन्द्रवह्नि-
　नेत्रां धनुःसुमशराङ्कुश कामपाशान् ।
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां
　कामेश्वरीं हृदि भजामि धृतेन्दुखण्डाम् ॥

२　　　　　श्री भगमालिनी नित्या　　　　　१४

कदम्बवनमध्यस्थामुद्यत्सूर्यसमद्युतिम् ।
नानाभरणसम्पन्नां त्रैलोक्याकर्षणक्षमाम् ॥
पाशाङ्कुशौ पुस्तकं च तौसीखीगतलेखिनीम् ।
वरदं चाभयं चैव दधतीं विश्वमातरम् ॥

३　　　　　श्री नित्यक्लिन्ना नित्या　　　　　१३

रक्तां रक्ताङ्गवसनां चन्द्रचूडां त्रिलोचनाम् ।
विद्युद्रक्तां महाघूर्णलोचनां रत्नभूषिताम् ॥
पाशाङ्कुशौ कपालं च महाभीतिहरं तथा ।
दधतीं संस्मरेन्नित्यां पद्मासनविराजिताम् ॥

४　　　　　श्री भेरुण्डा नित्या　　　　　१२

चन्द्रकोटिप्रतीकाशां स्रवन्तीममृतद्रवैः ।
नीलकण्ठां त्रिनेत्रां च नानाभरणभूषिताम् ॥

---

*கட்டாக், அஸிஸ்டெண்ட் இஞ்ஜினீயர் ஸ்ரீ T.V. வெங்கட்ரமணி அவர்களால் கொடுக்கப்பட்ட மற்றொரு பாடம்.

शुक्लपक्ष तिथि कृष्णपक्ष तिथि

इन्द्रनीलस्फुरत्कान्ति शिखिवाहनशोभिताम् ।
पाशाङ्कुशौ कपालं च च्छुरिकां वरदाभये ॥

५ श्री वह्निवासिनी नित्या ११

ध्यायेत्तां च सुवर्णाभां नानालङ्कारभूषितां ।
पाशाङ्कुशौ स्वस्तिकं च शक्तिं च वरदाभये ।
दधतीं रत्नमकुटां त्रैलोक्यतिमिरापहाम् ॥

६ श्री महावज्रेश्वरी नित्या १०

जपाकुसुमसङ्काशां रक्तांशुकविराजिताम् ।
माणिक्यभूषणां नित्यां नानाभूषाविभूषिताम् ॥
पाशाङ्कुशौ कपालस्य (श्च) सुधापानविघूर्णिताम् ॥

७ श्री शिवदूती नित्या ९

दूर्वानिभां त्रिनेत्रां च महासिंहासनासनाम् ।
शङ्खारिबाणचापांश्च सृणिपाशौ वराभये ॥
दधतीं चिन्तयेन्नित्यां शिवदूतीं महाकलाम् ॥

८ श्री त्वरिता नित्या ८

श्यामाङ्गीं रक्तसत्पाणि चरणाम्बुजशोभिताम् ।
नृपलाहिसुमञ्जीरां कण्ठरत्नविभूषिताम् ॥
स्वर्णांशुकां स्वर्णभूषां वैश्याहिद्वन्द्वमेखलाम् ॥

शुक्लपक्ष तिथि | कृष्णपक्ष तिथि

तनुमध्यां पीनवृत्तकुचयुग्मां वराभये ।
दधतीं शिखिपिञ्छाभां वलयाङ्गदशोभिताम् ॥

गुञ्जारुणां नृपाहीन्द्र केयूरां रक्तभूषणाम् ।
द्विजनागस्फुरत्कर्णभूषां रक्तारुणेक्षणाम् ॥

नीलकुञ्चितधम्मिल्लवनपुष्पकलापिनीम् ।
कैरातीं शिखिपत्राढ्य निकेतनविराजिताम् ॥
स्फुरत्सिंहासनप्रौढां स्मरेत् भयविनाशिनीम् ॥

९ श्री कुलसुन्दरी नित्या ७

अतिमधुरचापहस्तामपरिमितामोदबाणसौभाग्याम् ।
अरुणामतिशयकरुणामभिनवकुलसुन्दरीं वन्दे ॥

१० श्री नित्या (विमला) नित्या ६

तप्तकाञ्चनसंकाशां सर्वालङ्कारभूषिताम् ।
वराभयकरां नित्यां विमलां प्रणमाम्यहम् ॥

११ श्री नीलपताकिनी नित्या ५

रक्तां रक्तांशुकप्रौढां नानारत्नविभूषिताम् ।
इन्द्रनीलस्फुरन्नीलपताकां कमले स्थिताम् ॥

कामग्रैवेय संलग्न सृणी च वरदाभये ।
दधतीं परमेशानीं त्रैलोक्याकर्षलक्षणाम् ॥

शुक्लपक्ष तिथि		कृष्णपक्ष तिथि
१२	श्री विजया नित्या	४

दंष्ट्राकरालवदनां नरमालाविभूषिताम् ।
अस्थिचर्मविशेषाढ्यां वह्निकूटसमप्रभाम् ॥
व्याघ्राम्बरां महाप्रौढ शवासनविराजिताम् ।
रणे स्मरणमात्रेण भक्तेभ्यो विजयप्रदाम् ।
शूलं सर्पं च ढक्कासिसृणिघण्टाशनिद्वयम् ।
पाशमग्निमभीतिं च दधानां विजयां स्मरेत् ॥

१३ श्री सर्वमङ्गळा नित्या ३

शुभ्रपद्मासने रम्यां चन्द्रकुन्दसमद्युतिम् ।
सुप्रसन्नां शशिमुखीं नानारत्नविभूषिताम् ।
अनन्तमुक्ताभरणां स्रवन्तीममृतद्रवम् ।
वरदाभयशोभाढ्यां स्मरेत् सौभाग्यवर्धिनीम् ॥

१४ श्री ज्वालामालिनी नित्या २

उद्यद्विद्युल्लताकान्ति स्वर्णाभरणभूषिताम् ।
महासिंहासनप्रौढां ज्वालामालां करालिनीम् ।
अरिशङ्खौ खड्गखेटे त्रिशूलं डमरुं तथा ।
पानपात्रं च वरदं दधतीं संस्मरेत् यजेत् ॥

१५ श्री चित्रा (विचित्रा) नित्या १

शुभ्राङ्गी ज्ञानदा नित्यं विचित्रवसना सदा ।
विचित्रतिलका नित्यं विचित्रकुसुमोज्वला ।
वरदाभयशोभाढ्या नानारत्नधरा क्वचित् ॥

॥ अथ नित्या कवचम् ॥

श्री शिव उवाच :–

समस्तापद्विमुक्त्यर्थं सर्वसंपदवाप्तये ।
भूतप्रेतपिशाचादिपीडाशान्त्यै सुखाप्तये ॥ ॥ १ ॥

समस्त रोगनाशाय समरे विजयाय च ।
चोर सिंहद्वीपि गज गवयादि भयानके ॥ ॥ २ ॥

अरण्ये शैलगहने मार्गे दुर्भिक्षके तथा ।
सलिलादिमनःपीडास्वब्धौ पीतादिसंकटे ॥ ॥ ३ ॥

प्रजप्य नित्याकवचं सकृत् सर्वं तरत्यसौ ।
सुखी जीवति निर्द्वन्द्वो निःसपत्नो जितेन्द्रियः ॥ ॥ ४ ॥

शृणु तत्कवचं देवि वक्ष्ये तव तदात्मकम् ।
येनाहमपि युद्धेषु देवासुरजयी सदा ॥ ॥ ५ ॥

सर्वतः सर्वदाऽऽत्मानं ललिता पातु सर्वगा ।
कामेशी पुरतः पातु भगमालात्वनन्तरम् ॥ ॥ ६ ॥

दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा ।
नित्यक्लिन्नाऽथ भेरुण्डा दिशं पातु सदा मम ॥ ॥ ७ ॥

तथैव पश्चिमं भागं रक्षेत्सा वह्निवासिनी ।
महावज्रेश्वरी रक्षेदनन्तरदिशं सदा ॥ ॥ ८ ॥

वामपार्श्वं सदा पातु दूती मे त्वरिता ततः ।
पालयेत्तु दिशं चान्यां रक्षेन्मां कुलसुन्दरी ॥ ॥ ९ ॥

नित्या मामूर्ध्वतः पातु साऽधो मे पातु सर्वदा ।
नित्या नीलपताकाख्य विजया सर्वतश्च माम् ॥ ॥ १० ॥

करोतु मे मङ्गलानि सर्वदा सर्वमङ्गला ।
देहेन्द्रियमनःप्राणान् ज्वालामालिनि विग्रहा ॥ ॥ ११ ॥

पालयेदनिशं चित्रा चित्तं मे पातु सर्वदा ।
कामक्रोधात् तथालोभान्मोहान्मानान्मदादपि ॥ ॥ १२ ॥

पापान्मत्सरतः शोकात्संशयात्सर्वतः सदा ।
स्तैमित्याच्च समुद्योगात् अशुभेषु तु कर्मसु ॥ ॥ १३ ॥

असत्यात्क्रूरचिन्तातो हिंसातश्चौर्यतस्तथा ।
रक्षन्तु मां सर्वदा ताः कुर्वन्त्विच्छां शुभेषु च ॥ ॥ १४ ॥

नित्याः षोडश मां पान्तु गजारूढाःस्वशक्तिभिः ।
तथा हयसमारूढाः पान्तु मां सर्वतः सदा ॥ ॥ १५ ॥

सिंहारूढास्तथा पान्तु मां तरक्षुगता अपि ।
रथारूढाश्च मां पान्तु सर्वतः सर्वदा रणे ॥ ॥ १६ ॥

तार्क्ष्यारूढाश्च मां पान्तु तथा व्योमगतास्तथा ।
भूगताः सर्वतः पान्तु माञ्च सर्वत्र सर्वदा ॥ ॥ १७ ॥

भूतप्रेतपिशाचापस्मारकृत्यादिकान्गदान् ।
द्रावयन्तु स्वशक्तीनां भीषणैरायुधैर्मम ॥ ॥ १८ ॥

गजाश्वद्वीपिपञ्चास्य तार्क्ष्यारूढाखिलायुधाः ।
असंख्याः शक्तयो देव्याः पान्तु मां सर्वतः सदा ॥ ॥ १९ ॥

सायं प्रातर्जपेन्नित्याकवचं सर्वरक्षकम् ।
कदाचिन्नाशुभं पश्येन्न शृणोति च मत्समः ॥ ॥ २० ॥

॥ इति नित्याकवचं सम्पूर्णम् ॥

शुभम्

॥ भावनोपनिषत् ॥

स्वाविद्यापदतत्कार्यं श्रीचक्रोपरि भासुरम् ।
बिन्दुरूपशिवाकारं रामचन्द्रपदं भजे ॥ १ ॥

ॐ भद्रं कर्णेभिश्शृणुयाम देवाः, भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः, व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदाः,
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः, स्वस्ति नो बृहस्पतिर्दधातु ।
ओं शान्तिश्शान्तिश्शान्तिः ॥

हरिः ॐ ॥ आत्मानमखण्डमण्डलाकारमावृत्य सकलब्रह्माण्डमण्डलं स्वप्रकाशं ध्यायेत् । ॐ श्रीगुरुः सर्वकारणभूता शक्तिः । तेन नवरन्ध्ररूपो देहः । नवशक्तिरूपं श्रीचक्रम् । वाराही पितृरूपा । कुरुकुल्ला बलिदेवता माता । पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः । आधारनवकमुद्राः शक्तयः । त्वगादिसप्तधातुभिरनेकैः संयुक्ताः संकल्पाः कल्पतरवः । तेजः कल्पकोद्यानम् । रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणभेदाः षड्रसाः षडृतवः । क्रियाशक्तिः पीठम् । कुण्डलिनी ज्ञानशक्तिर्गृहम् । इच्छाशक्तिर्महात्रिपुरसुन्दरी । ज्ञाता होता ज्ञानमग्निः ज्ञेयं हविः । ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम् । नियतिसहिताः शृङ्गारादयो नव रसा अणिमादयः । कामक्रोधलोभमोहमदमात्सर्यपुण्यपापमया ब्राह्म्याद्यष्ट शक्तयः । पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थमनोविकाराः षोडश शक्तयः । वचनादानगमनविसर्गानन्दहानोपेक्षाबुद्धयोऽनङ्गकुसुमादिशक्तयोऽष्टौ । अलम्बुसा कुहूर्विश्वोदरी वरुणा हस्तिजिह्वा यशस्वत्यश्विनी गान्धारी पूषा शङ्खिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः । सर्वसंक्षोभिण्यादिचतुर्दशारगा देवताः । प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनंजया इति दश वायवः । सर्वसिद्धिप्रदा देव्यो बहिर्दशारगा देवताः । एतद्वायुदशकसंसर्गोपाधिभेदेन रेचकपूरकशोषकदाहकप्लावका अमृतमिति प्राणमुख्यत्वेन पञ्चविधोऽस्ति । क्षारको दारकः क्षोभको मोहको जृम्भक इत्यपानमुख्यत्वेन पञ्चविधोऽस्ति । तेन मनुष्याणां मोहको दाहको भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं चतुर्विधमन्नं पाचयति ।

एता दश वह्निकलाः सर्वज्ञत्वाद्यन्तर्दशारगा देवताः । शीतोष्णसुखदुःखेच्छा-सत्वरजस्तमोगुणा वशिन्यादिशक्तयोऽष्टौ । शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्च पुष्पबाणा मन इक्षुधनुः । वश्यो बाणो रागः पाशः । द्वेषोऽङ्कुशः । अव्यक्त महत्तत्त्वमहदहंकार इति कामेश्वरी–वज्रेश्वरी–भगमालिन्योऽन्तस्त्रिकोणाग्रगा देवताः । पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनस्थितिः पञ्चदशनित्याः । श्रद्धानुरूपा धीर्देवता । तयोः कामेश्वरी सदानन्दघना परिपूर्णस्वात्मैक्यरूपा देवता । सलिलमिति लौहित्यकारणं सत्त्वम् । कर्तव्यमकर्तव्यमिति भावना-युक्त उपचारः । अस्ति नास्तीति कर्तव्यतानूपचारः । बाह्याभ्यन्तःकरणानां रूपग्रहणयोग्यतास्त्वित्यावाहनम् । तस्य बाह्याभ्यन्तःकरणानामेकरूपविषय-ग्रहणमासनम् । रक्तशुक्लपदैकीकरणं पाद्यम् । उज्ज्वलदामोदानन्दासनदान-मर्घ्यम् । स्वच्छं स्वतःसिद्धमित्याचमनीयम् । चिच्चन्द्रमयीति सर्वाङ्गस्रवणं स्नानम् । चिदग्निस्वरूपपरमानन्दशक्तिस्फुरणं वस्त्रम् । प्रत्येकं सप्तविंशतिधा भिन्नत्वेनेच्छाज्ञानक्रियात्मकब्रह्मग्रन्थिमद्रसतन्तुब्रह्मनाडी ब्रह्मसूत्रम् । स्वव्य-तिरिक्तवस्तुसङ्गरहितस्मरणं विभूषणम् । सच्चित्सुखपरिपूर्णतास्मरणं गन्धः । समस्तविषयाणां मनसः स्थैर्येणानुसन्धानं कुसुमम् । तेषामेव सर्वदा स्वीकरणं धूपः । पवनावच्छिन्नोर्ध्वज्वलनसच्चिदुल्काकाशदेहो दीपः । समस्तयातायात-वर्ज्यं नैवेद्यम् । अवस्थात्रयाणामेकीकरणं ताम्बूलम् । मूलाधारादाब्रह्मरन्ध्र-पर्यन्तं ब्रह्मरन्ध्रादामूलाधारपर्यन्तं गतागतरूपेण प्रादक्षिण्यम् । तुर्यावस्था नमस्कारः । देहशून्यप्रमातृतानिमज्जनं बलिहरणम् । सत्यमस्ति कर्तव्यमकर्तव्य-मौदासीन्यनित्यात्मविलापनं होमः । स्वयं तत्पादुकानिमज्जनं परिपूर्णध्यानम् । एवं मुहूर्तत्रयं (मुहूर्तद्वयं मुहूर्तमात्रं वा) भावनापरो जीवन्मुक्तो भवति । तस्य देवतात्मैक्यसिद्धिः । चिन्तितकार्याण्ययत्नेन सिध्यन्ति । स एव शिव-योगीति कथ्यते । कादिहादिमतोक्तेन भावना प्रतिपादिता । जीवन्मुक्तो भवति । य एवं वेद ॥ इत्युपनिषत् ॥ ॐ भद्रं कर्णेभिरिति शान्तिः ॥

हरिः ॐ तत्सत् ॥

इत्यथर्वणवेदे भावनोपनिषत्संपूर्णा ॥

"பிரணவ வாகர பிரஸ்" பதிப்பின்படி. உ-ண்ணாகு.

॥ भावनोपनिषत् ॥ *

स्वाविद्यापदतत्कार्यं श्रीचक्रोपरि भासुरम् ।
बिन्दुरूपशिवाकारं रामचन्द्रपदं भजे ॥ १ ॥

ॐ भद्रं कर्णेभिश्शृणुयाम देवाः, भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिः, व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः, स्वस्ति नः पूषा विश्ववेदाः,
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः, स्वस्ति नो बृहस्पतिर्दधातु ।
ओं शान्तिश्शान्तिश्शान्तिः ॥

हरिः ॐ ॥ आत्मानमखण्डमण्डलाकारमावृत्य सकलब्रह्माण्डमण्डलं स्वप्रकाशं ध्यायेत् । श्रीगुरुः सर्वकारणभूता शक्तिः ॥ १ ॥ तेन नवरन्ध्ररूपो देहः ॥ २ ॥ नवचक्ररूपं श्रीचक्रम् ॥ ३ ॥ वाराही पितृरूपा कुरुकुल्ला बलिदेवता माता ॥ ४ ॥ पुरुषार्थाः सागराः ॥ ५ ॥ देहो नवरत्नद्वीपः ॥ ६ ॥ त्वगादिसप्तधातुरोमसंयुक्तः ॥ ७ ॥ संकल्पाः कल्पतरवस्तेजः कल्पकोद्यानम् ॥ रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणरसाः षडृतवः ॥ ९ ॥ ज्ञानमर्घ्यं ज्ञेयं हविर्ज्ञाता होता ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम् ॥ १० नियतिः शृङ्गारादयो रसा अणिमादयः ॥ ११ ॥ कामक्रोधलोभमोहमदमात्सर्य्यपुण्यपापमया ब्राह्म्याद्यष्ट शक्तयः ॥ १२ ॥ आधारनवकं मुद्राशक्तयः ॥ पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थानि मनोविकारः कामाकर्षिण्यादिषोडश शक्तयः ॥ १४ ॥ वचनादानगमनविसर्गानन्दहानोपादानोपेक्षाख्यबुद्धयोऽनङ्गकुसुमाद्यष्टौ ॥ १५ ॥ अलंबुसा कुहूर्विश्वोदरा वारणा हस्तिजिह्वा यशोवती पयस्विनी गान्धारी पूषा शंखिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः सर्वसंक्षोभिण्यादिचतुर्दश शक्तयः ॥ १६ ॥

* இந்த பாடம் ஸ்ரீ பாஸ்கரராயர் பாஷ்யத்தை அனுஸரிக்கது.

प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनञ्जया दश वायवः सर्वसिद्धिप्रदादिबहिर्दशारदेवताः ॥ १७ ॥ एतद्वायुसंसर्गकोपाधिभेदेन रेचकः पाचकः शोषको दाहकः प्लावक इति प्राणमुख्यत्वेन पञ्चधा जठराग्निर्भवति ॥ १८ ॥ क्षारक उद्गारकः क्षोभको जृम्भको मोहक इति नागप्राधान्येन पञ्चविधास्ते मनुष्याणां देहगा भक्ष्यभोज्यचोष्यलेह्यपेयात्मकपञ्चविधमन्नं पाचयन्ति ॥ १९ ॥ एता दशवह्निकलास्सर्वज्ञाद्या अन्तर्दशारदेवताः ॥ २० ॥ शीतोष्णसुखदुःखेच्छाः सत्त्वं रजस्तमो वशिन्यादिशक्तयोऽष्टौ ॥ २१ ॥ शब्दादितन्मात्राः पञ्च पुष्पबाणाः ॥ २२ ॥ मन इक्षुधनुः ॥ २३ ॥ रागः पाशः ॥ २४ ॥ द्वेषोऽङ्कुशः ॥ २५ ॥ अव्यक्तमहदहङ्काराः कामेश्वरीवज्रेश्वरी भगमालिन्योऽन्तस्त्रिकोणगा देवताः ॥ २६ ॥ निरुपाधिकसंविदेव कामेश्वरः ॥ २७ ॥ सदानन्दपूर्णः स्वात्मैव परदेवता ललिता ॥ २८ ॥ लौहित्यमेतस्य सर्वस्य विमर्शः ॥ अनन्यचित्तत्वेन च सिद्धिः ॥ ३० ॥ भावनायाः क्रिया उपचारः ॥ ३१ ॥ अहं त्वमस्ति नास्ति कर्तव्यमकर्तव्यमुपासितव्यमिति विकल्पानामात्मनि विभावनं होमः ॥ ३२ ॥ भावनाविषयाणामभेदभावना तर्पणम् ॥ ३३ ॥ पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनम् ॥ ३४ ॥ एवं मुहूर्तत्रितयं मुहूर्तद्वितयं मुहूर्तमात्रं वा भावनापरो जीवन्मुक्तो भवति; स एव शिवयोगीति गद्यते ॥ ३५ ॥ कादिमतेनान्तश्चक्रभावनाः प्रतिपादिताः ॥ ३६ ॥ य एवं वेद सोऽथर्वशिरोऽधीते ॥ ३७ ॥

॥ भावनोपनिषत्प्रयोगः ॥

अथ भावनोपनिषदा मुक्त्यै या भावनाः कथिताः ।
भास्करराया रचयति तासामेवं प्रयोगविधिम् ॥

मूलेन प्राणानायम्य,
ऋष्यादिन्यासत्रयं कृत्वा ॥ गुरुध्यानम् ॥ गुरुत्रयम् ॥

प्रयोग महा

॥ न्यासः ॥

अस्य श्रीभावनोपनिषत्समन्त्रस्य ३ आनन्दभैरवाय ऋषये नमः—शिरसि। ३ पङ्क्त्यै छन्दसे नमः—मुखे । श्रीमहात्रिपुरसुन्दर्यै देवतायै नमः—हृदि । ३ ऐं बीजाय नमः—गुह्ये । ३ सौः शक्तये नमः—पादयोः । ३ क्लीं कीलकाय नमः—नाभौ । (उक्तबीजशक्तिकीलकानि नाभिगुह्यपादेषु प्रायशो न्यस्तव्यानीति, मूलविद्याखण्डत्रयेणापि न्यस्तव्यानीति च केषांचिदभिमतम्) । ३ श्रीललितामहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थे जपे विनियोगः—करसम्पुटे ॥

ऐं ह्रीं श्रीं मूलविद्यया सर्वाङ्गे त्रिः व्यापकम् ॥
३ क ए ई ल ह्रीं अङ्गुष्ठाभ्यां नमः ॥
३ ह स क ह ल ह्रीं तर्जनीभ्यां स्वाहा ॥
३ स क ल ह्रीं मध्यमाभ्यां वषट् ॥
३ क ए ई ल ह्रीं अनामिकाभ्यां हुम् ॥
३ ह स क ह ल ह्रीं कनिष्ठिकाभ्यां वौषट् ॥
३ स क ल ह्रीं करतलकरपृष्ठाभ्यां फट् ॥

एवं हृदयादिन्यासः, यथा—
ऐं ह्रीं श्रीं क ए ई ल ह्रीं हृदयाय नमः ॥
३ ह स क ह ल ह्रीं शिरसे स्वाहा ॥
३ स क ल ह्रीं शिखायै वषट् ॥
३ क ए ई ल ह्रीं कवचाय हुम् ॥

३ ह स क ह ल ह्रीं नेत्रत्रयाय वौषट् ॥
३ स क ल ह्रीं अस्त्राय फट् ॥
भूर्भुवस्सुवरोम् इति दिग्बन्धः ॥

विवेकवृत्त्यवच्छिन्न चिच्छक्तिरूपसुपुम्नात्मने श्रीगुरवे नमः ॥

इति ब्रह्मरन्ध्रं स्पृष्ट्वा,

दक्षश्रोत्ररूप	पयस्विन्यात्मने	प्रकाशानन्दनाथाय नमः ।
वामश्रोत्ररूप	शंखिन्यात्मने	विमर्शानन्दनाथाय नमः ।
जिह्वारूप	सरस्वत्यात्मने	श्रोत्रानन्दनाथाय नमः ।
दक्षनेत्ररूप	पूषात्मने	श्री ज्ञानानन्द नाथाय नमः ।
वामनेत्ररूप	गान्धार्यात्मने	श्रीसत्यानन्दनाथाय नमः ।
ह्रजरूप	कुह्वात्मने	श्रीपूर्णानन्दनाथाय नमः ।
दक्षनासारूप	पिङ्गलात्मने	स्वभावानन्दनाथाय नमः ।
वामनासारूप	इडात्मने	प्रतिभानन्दनाथाय नमः ।
पायुरूप	अलंबुसात्मने	सुभगानन्दनाथाय नमः ।

इति तत्तत्स्थनानि संपृश्य,

१. नवचक्ररूपश्रीचक्रात्मने देहाय नमः ।
पितृरूपास्थ्याद्यवयवात्मने वाराह्यै नमः ।
मातृरूपमांसाद्यवयवात्मने बलिदेवतायै कुरुकुलायै नमः ।

इति त्रिव्यापकम् ।

२.	देहपश्चाद्भागरूप	धर्मात्मने	इक्षुसागराय नमः
	देहदक्षिणभागरूप	अर्थात्मने	इरासागराय नमः ।
	देहप्राग्भागरूप	कामात्मने	घृतसागराय नमः ।
	देहोदग्भागरूप	मोक्षात्मने	क्षीरसागराय नमः ।

देहात्मने नवरत्नद्वीपाय नमः । व्यापकम् ।

३.	मांसात्मने	पुष्परागरत्नाय नमः।
	रोमात्मने	नीलरत्नाय नमः।
	त्वगात्मने	वैडूर्यरत्नाय नमः।
	रुधिरात्मने	माणिक्यरत्नाय नमः।
	शुक्रात्मने	मौक्तिकरत्नाय नमः।
	मज्जात्मने	मरकतरत्नाय नमः।
	अस्थ्यात्मने	वज्ररत्नाय नमः।
	मेदआत्मने	गोमेदकरत्नाय नमः।
	ओजआत्मने	पद्मरागरत्नाय नमः।
४.	मांसाधिदेवतायै	कालचक्रेश्वर्यै नमः।
	रोमाधिदेवतायै	मुद्राचक्रेश्वर्यै नमः।
	त्वगधिदेवतायै	मातृकाचक्रेश्वर्यै नमः।
	रुधिराधिदेवतायै	रत्नचक्रेश्वर्यै नमः।
	शुक्राधिदेवतायै	देशचक्रेश्वर्यै नमः।
	मज्जाधिदेवतायै	गुरुचक्रेश्वर्यै नमः।
	अस्थ्याधिदेवतायै	तत्त्वचक्रेश्वर्यै नमः।
	मेदोऽधिदेवतायै	ग्रहचक्रेश्वर्यै नमः।
	ओजोऽधितेवतायै	मूर्तिचक्रेश्वर्यै नमः।
५.	संकल्पात्मभ्यः	कल्पतरुभ्यो नमः।
	तेजआत्मने	कल्पकोद्यानाय नमः।
६.	मधुररसात्मने	वसन्तर्तवे नमः।
	अम्लरसात्मने	ग्रीष्मर्तवे नमः।
	तिक्तरसात्मने	वर्षर्तवे नमः।
	कटुरसात्मत्ने	शरदृतवे नमः।
	कषायरसात्मने	हेमन्तर्तवे नमः।
	लवणरसात्मने	शिशिरर्तवे नमः।

७. इन्द्रियात्मभ्योऽश्वेभ्यो नमः ।

इन्द्रियार्थात्मभ्यो गजेभ्यो नमः ।

करुणात्मिकायै तोयपरिखायै नमः ।

ओजःपुञ्जात्मने माणिक्यमण्डपाय नमः ।

ज्ञानात्मने विशेषार्घ्याय नमः ।

ज्ञेयात्मने हविषे नमः ।

ज्ञात्रात्मने स्वात्मने नमः ।

चिदात्मने श्रीमहात्रिपुरसुन्दर्यै नमः ।

इति तत्तदनुसन्धानपूर्वकं मनसा नत्वा,

८. ज्ञातृज्ञानज्ञेयानां नामरूपविलापनानुसन्धानेन चिन्मात्ररूपता-
विभावनेन क्षणं विश्रम्य पञ्चदश नित्या यजेत् ॥

हृदि हस्तं निधाय,

चत्वारिंशदधिकचतुर्दशशतश्वासात्मने
प्रतिपत्तिथिरूपकामेश्वरीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
द्वितीयातिथिरूपभगमालिनीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
तृतीयातिथिरूपनित्यक्लिन्नानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
चतुर्थीतिथिरूपभेरुण्डानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
पञ्चमीतिथिरूपवह्निवासिनीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
षष्ठीतिथिरूपवज्रेश्वरीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
सप्तमीतिथिरूपशिवदूतीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
अष्टमीतिथिरूपत्वरितानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
नवमीतिथिरूपकुलसुन्दरीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
दशमीतिथिरूपनित्यानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
एकादशीतिथिरूपनीलपताकानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
द्वादशीतिथिरूपविजयानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
त्रयोदशीतिथिरूपसर्वमङ्गलानित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
चतुर्दशीतिथिरूपज्वालामालिनीनित्यायै नमः ।

तदुत्तरचत्वारिंशदधिकचतुर्दशशतश्वासात्मने
पौर्णमासीतिथिरूपचित्रानित्यायै नमः ।

नित्यामन्त्रानपि तत्तदादौ केचित्पठन्ति । इयं नित्याभावना सर्वान्ते एव वा कार्या । चतुरश्रावरेखायै नम इति वक्ष्यमाणस्थानेषु व्यापकं न्यस्य ।

१.	दक्षांसपृष्ठरूप	शान्तरसात्मने	अणिमासिद्ध्यै नमः ।
	दक्षपाण्यङ्गुल्यग्ररूप	अद्भुतरसात्मने	लघिमासिद्ध्यै नमः ।
	दक्षस्फिक्रूप	करुणरसात्मने	महिमासिद्ध्यै नमः ।
	दक्षपादाङ्गुल्यग्ररूप	वीररसात्मने	ईशितासिद्ध्यै नमः ।

वामपादाङ्गुल्यग्ररूप	हास्यरसात्मने	वशितासिद्ध्यै नमः ।
वामस्फिग्रूप	बीभत्सरसात्मने	प्राकाम्यसिद्ध्यै नमः ।
वामपाण्यङ्गुल्यग्ररूप	रौद्ररसात्मने	भुक्तिसिद्ध्यै नमः ।
वामांसपृष्ठरूप	भयानकरसात्मने	इच्छासिद्ध्यै नमः ।
चूलीमूलरूप	शृङ्गाररसात्मने	प्राप्तिसिद्ध्यै नमः ।
चूलीपृष्ठरूप	नियत्यात्मने	सर्वकामसिद्ध्यै नमः ।

चतुरश्रमध्यरेखायै नम इति । तदन्तर्व्यापकं न्यस्य

पादाङ्गुष्ठद्वयरूप	कामात्मने	ब्राह्म्यै नमः ।
दक्षपार्श्वरूप	क्रोधात्मने	माहेश्वर्यै नमः ।
मूर्द्धरूप	लोभात्मने	कौमार्यै नमः ।
वामपार्श्वरूप	मोहात्मने	वैष्णव्यै नमः ।
वामजानुरूप	मदात्मने	वाराह्यै नमः ।
दक्षजानुरूप	मात्सर्य्यात्मने	इन्द्राण्यै नमः ।
दक्षबहिरंसरूप	पुण्यात्मने	चामुण्डायै नमः ।
वामबहिरंसरूप	पापात्मने	महालक्ष्म्यै नमः ।

चतुरश्रान्त्यरेखायै नम इति तदन्तर्व्यापकं न्यस्य पादाङ्गुष्ठद्वयरूपायेति ।

सहस्रदलकमलात्मने	सर्वसंक्षोभिणीमुद्रायै नमः ।
दक्षपार्श्वरूपमूलाधारात्मने	सर्वविद्राविणीमुद्रायै नमः ।
मूर्धरूपस्वाधिष्ठानात्मने	सर्वाकर्षिणीमुद्रायै नमः ।
वामपार्श्वरूपमणिपूरात्मने	सर्वशङ्करीमुद्रायै नमः ।
वामजानुरूपानाहतात्मने	सर्वोन्मादिनीमुद्रायै नमः ।
दक्षजानुरूपविशुद्धात्मने	सर्वमहांकुशामुद्रायै नमः ।
दक्षान्तरांसरूपत्रियोन्यात्मने	सर्वखेचरीमुद्रायै नमः ।
वामान्तरांसरूपज्ञानात्मने	सर्वबीजमुद्रायै नमः ।
द्वादशान्त[र]रूपोर्ध्वसहस्रदलकमलात्मने	सर्वयोनिमुद्रायै नमः।

पादाङ्गुष्ठरूपाधारनवकात्मने सर्वत्रिखण्डामुद्रायै नमः ।
हृद्रूपत्रैलोक्यमोहनचक्रेश्वर्यै त्रिपुरायै नमः ।

इति तत्तत्स्थानानि स्पृष्ट्वैताः सर्वाः स्वात्माभिन्नत्वेन विभाव्य स्वात्मनः परिच्छेदराहित्यं विभावयेत् ।

प्रकटयोगिनीरूपस्वात्मात्मने अणिमासिद्ध्यै नमः ।
अपरिच्छिन्नस्वात्मात्मने सर्वसंक्षोभिणीमुद्रायै नमः ।

इति प्रयोगपूर्वकं वा विभावयेत्। षोडशदलपद्माय नम इति तदन्तर्व्यापकं न्यस्य।

१०. दक्षश्रोत्रपृष्ठरूपपृथिव्यात्मने कामाकर्षिणीनित्याकलायै नमः ।
दक्षांसरूपाबात्मने बुद्ध्याकर्षिणीनित्याकलायै नमः :
दक्षकूर्पररूपतेजआत्मने अहंकाराकर्षिणीनित्याकलायै नमः ।
दक्षकरपृष्ठरूपवाय्वात्मने शब्दाकर्षिणीनित्याकलायै नमः ।
दक्षोरुरूपाकाशात्मने स्पर्शाकर्षिणीनित्याकलायै नमः ।
दक्षजानुरूपश्रोत्रात्मने रूपाकर्षिणीनित्याकलायै नमः ।
दक्षगुल्फरूपत्वगात्मने रसाकर्षिणीनित्याकलायै नमः ।
दक्षपादतलरूपचक्षुरात्मने गन्धाकर्षिणीनित्याकलायै नमः ।
वामपादतलरूपजिह्वात्मने चित्ताकर्षिणीनित्याकलायै नमः ।
वामगुल्फरूपघ्राणात्मने धैर्याकर्षिणीनित्याकलायै नमः ।
वामजानुरूपवागात्मने स्मृत्याकर्षिणीनित्याकलायै नमः ।
वामोरुरूपपाण्यात्मने नामाकर्षिणीनित्याकलायै नमः ।
वामकरपृष्ठरूपपादात्मने बीजाकर्षिणीनित्याकलायै नमः ।
वामकूर्पररूपपाय्वात्मने आत्माकर्षिणीनित्याकलायै नमः ।
वामांसरूपोपस्थात्मने अमृताकर्षिणीनित्याकलायै नमः ।
वामश्रोत्रपृष्ठरूपविकृतमनआत्मने शरीराकर्षिणीनित्याकलायै नमः ।
हृद्रूपसर्वाशापरिपूरकचक्रेश्वर्यै त्रिपुरेश्वर्यै नमः ।

गुप्तयोगिनीरूपस्वात्मात्मने लघिमासिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने सर्वविद्राविणीमुद्रायै नमः ।

११. अष्टदलपद्माय नम इति व्यापकं न्यस्य ।

दक्षशङ्खरूपवचनात्मने अनङ्गकुसुमायै नमः ।
दक्षजत्रुरूपादानात्मने अनङ्गमेखलायै नमः ।
दक्षोरुरूपगमनात्मने अनङ्गमदनायै नमः ।
दक्षगुल्फरूपविसर्गात्मने अनङ्गमदनातुरायै नमः ।
वामगुल्फरूपानन्दात्मने अनङ्गरेखायै नमः ।
वामोरुरूपहानाख्यबुद्ध्यात्मने अनङ्गवेगायै नमः ।
वामजत्रुरूपोपादानाख्यबुद्ध्यात्मने अनङ्गाङ्कुशायै नमः ।
वामशङ्खरूपोपेक्षाख्यबुद्ध्यात्मने अनङ्गमालिन्यै नमः ।
हृद्रूपसर्वसंक्षोभणचक्रेश्वर्यै त्रिपुरसुन्दर्यै नमः ।
गुप्ततरयोगिनीरूपस्वात्मात्मने महिमासिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने सर्वाकर्षिणीमुद्रायै नमः ।

१२. चतुर्दशारचक्राय नम इति व्यापकं न्यस्य ।

ललाटमध्यभागरूपालंबुसात्मने सर्वसंक्षोभिणीशक्त्यै नमः ।
ललाटदक्षभागरूपगुह्यात्मने सर्वविद्राविणीशक्त्यै नमः ।
दक्षगण्डरूपविश्वोदरात्मने सर्वाकर्षिणीशक्त्यै नमः ।
दक्षांसरूपवारणात्मने सर्वाह्लादिनीशक्त्यै नमः ।
दक्षपार्श्वरूपहस्तिजिह्वात्मने सर्वसम्मोहिनीशक्त्यै नमः ।
दक्षोरुरूपयशोवत्यात्मने सर्वस्तम्भिनीशक्त्यै नमः ।
दक्षजङ्घारूपपयस्विन्यात्मने सर्वजम्भिनीशक्त्यै नमः ।
वामजङ्घारूपगान्धार्यात्मने सर्ववशङ्करीशक्त्यै नमः ।
वामोरुरूपपूषात्मने सर्वरञ्जिनीशक्त्यै नमः ।
वामपार्श्वरूपशङ्खिन्यात्मने सर्वोन्मादिनीशक्त्यै नमः ।

वामांसरूपसरस्वत्यात्मने	सर्वार्थसाधिनीशक्तयै नमः ।
वामगण्डरूपेडात्मने	सर्वसम्पत्तिपूरणीशक्तयै नमः ।
ललाटवामभागरूपपिङ्गलात्मने	सर्वमन्त्रमयीशक्तयै नमः ।
ललाटपृष्ठभागरूपसुषुम्नात्मने	सर्वद्वन्द्वक्षयंकरीशक्तयै नमः ।
हृद्रूपसर्वसौभाग्यदायकचक्रेश्वर्यै	त्रिपुरवासिन्यै नमः ।
सम्प्रदाययोगिनीरूपस्वात्मात्मने	ईशितासिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने	सर्ववशङ्करीमुद्रायै नमः ।

१३. बहिर्दशारचक्राय नम इति व्यापकं न्यस्य ।

दक्षाक्षिरूपप्राणात्मने	सर्वसिद्धिप्रदादेव्यै नमः ।
नासामूलरूपापानात्मने	सर्वसम्पत्प्रदादेव्यै नमः ।
वामनेत्ररूपव्यानात्मने	सर्वप्रियङ्करीदेव्यै नमः ।
कुक्षीशकोणरूपोदानात्मने	सर्वमङ्गलकारिणीदेव्यै नमः ।
कुक्षिवायुकोणरूपसमानात्मने	सर्वकामप्रदादेव्यै नमः ।
वामजानुरूपनागात्मने	सर्वदुःखविमोचिनीदेव्यै नमः ।
गुदरूपकूर्मात्मने	सर्वमृत्युप्रशमनीदेव्यै गमः ।
दक्षजानुरूपकृकरात्मने	सर्वविघ्नविनाशिनीदेव्यै नमः ।
कुक्षिनिरृतिकोणरूपदेवदत्तात्मने	सर्वाङ्गसुन्दरीदेव्यै नमः ।
कुक्षिवह्निकोणरूपधनञ्जयात्मने	सर्वसौभाग्यदायिनीदेव्यै नमः ।
हृद्रूपसर्वार्थसाधकचक्रेश्वर्यै	त्रिपुराश्रियै नमः ।
कुलकौलयोगिनीरूपस्वात्मात्मने	वशितासिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने	सर्वोन्मादिनीमुद्रायै नमः ।

१४. अन्तर्दशारचक्राय नम इति व्यापकं न्यस्य ।

दक्षनासारूपरेचकाग्न्यात्मने	सर्वज्ञादेव्यै नमः ।
दक्षस्रक्किरूपपाचकाग्न्यात्मने	सर्वशक्तिप्रदादेव्यै नमः ।
दक्षस्तनरूपशोषकाग्न्यात्मने	सर्वैश्वर्यप्रदादेव्यै नमः ।
दक्षवृषणरूपदाहकाग्न्यात्मने	सर्वज्ञानमयीदेव्यै नमः ।

सीवनीरूपप्लावकाग्न्यात्मने सर्वव्याधिविनाशिनीदेव्यै नमः ।
वामवृषणरूपक्षारकाग्न्यात्मने सर्वाधारस्वरूपादेव्यै नमः ।
वामस्तनरूपोद्गारकाग्न्यात्मने सर्वपापहरादेव्यै नमः ।
वामसृक्किरूपक्षोपकाग्न्यात्मने सर्वानन्दमयीदेव्यै नमः ।
वामनासारूपजृम्भकाग्न्यात्मने सर्वरक्षास्वरूपिणीदेव्यै नमः ।
नासाग्ररूपमोहकाग्न्यात्मने सर्वेप्सितफलप्रदादेव्यै नमः ।
हृद्रूपसर्वरक्षाकरचक्रेश्वर्यै त्रिपुरमालिन्यै नमः ।
निगर्भयोगिनीरूपस्वात्मात्मने प्राकाम्यसिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने महाङ्कुशामुद्रायै नमः ।


१५. अष्टकोणचक्राय नम इति व्यापकं न्यस्य ।

चिबुकदक्षभागरूपशीतात्मने वशिनीवाग्देवतायै नमः ।
कण्ठदक्षभागरूपोष्णात्मने कामेश्वरीवाग्देवतायै नमः ।
प हृदयदक्षभागरू[रूप]सुखात्मने मोदिनीवाग्देवतायै नमः ।
नाभिदक्षभागरूपदुःखात्मने विमलावाग्देवतायै नमः ।
नाभिवामभागरूपेच्छात्मने अरुणावाग्देवतायै नमः ।
हृदयवामभागरूपसत्त्वगुणात्मने जयिनीवाग्देवतायै नमः ।
कण्ठवामभागरूपरजोगुणात्मने सर्वेश्वरीवाग्देवतायै नमः ।
चिबुकवामभागरूपतमोगुणात्मने कौलिनीवाग्देवतायै नमः ।
हृद्रूपसर्वरोगहरचक्रेश्वर्यै त्रिपुरासिद्धायै नमः ।
रहस्ययोगिनीरूपस्वात्मात्मने भुक्तिसिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने खेचरीमुद्रायै नमः ।

१६. हृदयत्रिकोणाधोभागरूपपञ्चतन्मात्रात्मकेभ्यः सर्वजम्भनबाणेभ्यो नमः ।

तद्दक्षभागरूपमनआत्मकाभ्यां सर्वमोहनधनुर्भ्यां नमः ।
तदूर्ध्वभागरूपरागात्मकाभ्यां सर्ववशङ्करपाशाभ्यां नमः ।
तद्वामभागरूपद्वेषात्मभ्यां सर्वस्तम्भकराङ्कुशाभ्यां नमः ।

१७. त्रिकोणचक्राय नमः इति व्यापकं न्यस्य।



हृदयत्रिकोणाग्रभागरूपमहत्तत्त्वात्मने	कामेश्वरीदेव्यै नमः।
तद्दक्षकोणरूपाहङ्कारात्मने	वज्रेश्वर्यै देव्यै नमः।
तद्वामकोणरूपाव्यक्तात्मने	भगमालिनी देव्यै नमः।
हृद्रूपसर्वसिद्धिप्रदचक्रेश्वर्यै	त्रिपुराम्बायै नमः।
अतिरहस्ययोगिनीरूपस्वात्मात्मने	इच्छासिद्ध्यै नमः।
अपरिच्छिन्नस्वात्मात्मने	बीजमुद्रायै नमः।

१८. बिन्दुचक्राय नम इति व्यापकं न्यस्य।

हृन्मध्यरूपनिरुपाधिकसंविन्मात्ररूप कामेश्वराङ्कनिलयायै सच्चिदानन्दैकब्रह्मात्मने परदेवतायै ललितायै महात्रिपुरसुन्दर्यै नमः। निरुपाधिकचैतन्यमेव सच्चिदानन्दधर्मकमन्तःकरणप्रतिबिम्बितम् सदाऽहमेवेत्यनुसन्धानं ललिताया लौहित्यमिति विभाव्य अभेद-सम्बन्धेन चित्त्वादिधर्म्मविशिष्टसंविदश्च तादात्म्यसम्बन्धरूपं कामाङ्क-यन्त्रणं विशेषणं विभाव्य उपाध्यभावरूपशुक्लत्वेनोपलक्षिता सती शुद्धसंविदेव शुक्लचरणः। चित्तविशिष्टसंवित्प्राथमिकपराहन्तात्मकवृत्ति-रूपेण रागेणोपलक्षिता सती रक्तचरणः। अहमाकारवृत्तिनिरूपिता विषयता चरणयोर्मिथो विशेषणविशेष्यभावरूपैव तदुभयसामरस्यमिति विभाव्य।

हृद्रूपसर्वानन्दमयचक्रेश्वर्यै महात्रिपुरसुन्दर्यै नमः ।
परापररहस्ययोगिनीरूपस्वात्मात्मने प्राप्तिसिद्ध्यै नमः ।
अपरिच्छिन्नरूपस्वात्मात्मने योनिमुद्रायै नमः ।

इति तत्तत्स्थानस्पर्शपूर्व्वकं सम्यगनुसन्धायोपचारान् समर्पयेत् ।

आसनम् ॥ तद्यथा—एवमपरिच्छिन्नतया भाविताया ललितायाः स्वे महिम्नेयव प्रतिष्ठितमासनम् अनुसन्दधामि ।

पाद्यम् ॥ वियदादिस्थूलप्रपञ्चरूपपादगतस्य नामरूपात्मकमलस्य सच्चिदानन्दैकरूपत्वभावनाजलेन क्षालनं पाद्यं भावयामि ।

अर्घ्यम् ॥ सूक्ष्मप्रपञ्चरूपहस्तगतस्य तस्य क्षालनमर्घ्यं चिन्तयामि ।

आचमनीयम् ॥ भावनारूपाणामपामपि कबलीकाररूपमाचमनं विभावयामि ।

स्नानम् ॥ सत्त्वचित्त्वानन्दत्वाद्यखिलावयवावच्छेदेन भावनाजलसम्पर्करूपं स्नानमनुचिन्तयामि ।

वस्त्रम् ॥ तेष्वेवावयवेषु प्रसक्ताया भावनात्मकवृत्तिविशेष्यतायाः प्रोञ्छनं वृत्तिविषयत्वभावनेन वस्त्रं कल्पयामि ।

आभरणम् ॥ निर्विषत्वनिरञ्जनत्वाशोकत्वामृतत्वाद्यनेकधर्म्मरूपाण्याभरणानि धर्म्यभेदभावनेन समर्पयामि ।

गन्धम् ॥ स्वशरीरघटकपार्थिवभागानां जडतापनयेन चिन्मात्रतावशेषरूपं गन्धं प्रयच्छामि ।

पुष्पाणि ॥ आकाशभागानां तथा भावनेन पुष्पाणि ददामि ।

धूपम् ॥ वायव्यभागानां तथा भावनया धूपयामि ।

दीपम् ॥ तैजसभागानां तथाकरणेनोद्दीपयामि ।

निवेद्यम् ॥ अमृतभागांस्तथा विभाव्य निवेदयामि ।

ताम्बूलम् ॥ षोडशान्तेन्दुमण्डलस्य तथा भावनेन ताम्बूलकल्पमाचरामि ।

स्तोत्रम् ॥ परापश्यन्त्यादि निखिल शब्दानां नादद्वारा ब्रह्मण्युपसंहार-चिन्तनेन स्तुवीमि ।

प्रदक्षिणम् ॥ विषयेषु धावमानानां चित्तवृत्तीनां विषयजडतानिरासेन ब्रह्मणि विलापनेन प्रदक्षिणीकरोमि ।

नमस्कारः ॥ तासां विषयेभ्यः परावर्तनेन ब्रह्मैकप्रवणतया प्रणमामि ।

होमम् ॥ विहिताविहितविषया वृत्तय उत्पन्ना अहं त्वं गुरुर्दैवतेत्याद-यस्ताः सर्व्वाश्चक्रराजस्थानन्तशक्तिकदम्बरूपास्तत्तत्सूक्ष्मरूपा ये ये संस्काराश्च तत्सर्वं चिन्मात्रमेवेति विभावनया निर्व्युत्थानं स्वात्मनि जुहोमि । इति उपचर्य्य जुहुयात् ।

तर्पणम् ॥ प्रकृतभावनासु ये गुरुचरणादिशक्तिकदम्बान्ता विषयास्ते सर्वेऽपि चिन्मात्ररूपा न परस्परं भिद्यन्त इति भावनया तर्पयामि ।

ब्रह्मविभावनम् ॥ तिथिचक्रमुक्तरूपं कालचक्रं देशचक्रं च सर्व्वमस्ति भाति प्रियञ्च न तु नामरूपवत् अतः सर्वं ब्रह्मैवेति विभावयामि ॥

अथवा

पूर्व्वलिखितां नित्याभावनामिहैव श्वासविलापनफलिकां कुर्य्यात् ॥

प्रणव चिन्तनम्॥ तेन मनःपवनात्मनामैक्यनिफालनेन त्रीन् मुहूर्त्तान् द्वावेकं मुहूर्तमवच्छिन्नं यापयेत् ।

ततोऽवतीर्य्य प्रणायामत्रयं ऋष्यादिन्यासत्रयञ्च कृत्वा ।
गुरुं स्तुवीतेति सर्वं शिवम् ॥

अथर्वशिरसि प्रोक्तभावनानां सतां मुदे ।
इति भास्कररायेण प्रयोगविधिरीरितः ॥

भावनोपनिषत्प्रयोगविधिः समाप्तः ।



Printed at the Sri Janardna Printing works, Ltd.,
Town High School Road :: Kumbakonam.